लोकप्रियसाहित्यग्रन्थमाला-14

श्री 'काश्मीरिक' सदानन्दयतिप्रणीतः

स्वरूपप्रकाशः

(सप्तदशशताब्द्यां विरचितोऽद्वैतवेदान्तग्रन्थः)

गयाचरणः त्रिपाठी

राष्ट्रिय संस्कृत संस्थान

नई दिल्ली

लोकप्रियसाहित्यग्रन्थमाला–14

श्री 'काश्मीरिक' सदानन्दयतिप्रणीतः

स्वरूपप्रकाशः

(सप्तदशशताब्द्यां विरचितोऽद्वैतवेदान्तग्रन्थः)

प्रधानसम्पादकः

प्रो. राधावल्लभः त्रिपाठी

सम्पादकः

गयाचरणः त्रिपाठी

राष्ट्रिय संस्कृत संस्थान

मानित विश्वविद्यालय

(मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन)

नई दिल्ली

प्रकाशक:

कुलसचिव,

राष्ट्रिय संस्कृत संस्थान

(मानित विश्वविद्यालय)

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,

नई दिल्ली-110058

ईपीएबीएक्स : 28524993, 28521994, 28524995

तार : संस्थान

ई मेल : rsks@nda.vsnl.net.in

वेबसाईट : www.sanskrit.nic.in

प्रथम संस्करण : 2010

ISBN : 978-93-86111-41-8

मूल्य : 90.00 रुपये

मुद्रक :

डी.वी. प्रिंटर्स

97-यू.बी., जवाहर नगर, दिल्ली-110007

मो.: 9818279798

पुरोवाक्

श्रीसदानन्दयतीन्द्रविरचितोऽयं स्वरूपप्रकाशाख्यो ग्रन्थः ऐदम्प्राथम्येन संस्थानेन प्रकाश्यत इति नितरां मोमुद्यामहे! एतस्य रचयिता वेदान्तसाररचयितुः श्रीसदानन्दाद् भिन्न इति स्पष्टम्। एतस्य प्रबन्धा श्रीसदानन्दयतीन्द्रः काश्मीरदेशीयः श्रीब्रह्मानन्दसरस्वतीनां सच्छिष्यः। अद्वैतवेदान्तमतानुसारेणात्र आत्मस्वरूपं प्रकाशितमस्ति। परिच्छेदक्रमेण चतुर्धा विभक्तोऽयं ग्रन्थ इत्यत्र ग्रन्थकर्तुर्वाक्यमेव प्रमाणम्। तद्यथा तृतीयपरिच्छेद आरम्भे – परिच्छेदद्वयेन त्वम्पदार्थप्रकाशनं कृतं, चतुर्थपरिच्छेदस्यारम्भे च परिच्छेदत्रयेण दृक्पदार्थः प्रकाशितः इति।

आत्मतत्त्वप्रकाशाख्ये प्रथमे द्वितीये च परिच्छेदे स्वप्रकाशपरमानन्दरूपे आत्मनि सर्वसंसारधर्मासंसर्गिणि स्थूलसूक्ष्मशरीरद्वयतत्कारणाविद्याख्योपाधित्रय-विवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वप्रतिभासो बन्धः तन्निवृत्तिस्तु मोक्ष इत्यद्वैतसिद्धान्तानुसारेण सरलं निरूपणं मोक्षस्य केनाऽप्यप्रस्तुतपूर्वम्। निरूपणावसरे श्रीशङ्करभगवत्पादस्य वार्त्तिककारस्य च मतान्युल्लिख्य सप्रमाणं प्रस्तौतीत्यस्य ग्रन्थस्य वैशिष्ट्यम्। तृतीये परिच्छेदे तत्पदार्थो निरूप्यते। अन्वयादिपरिकल्पितानां पदार्थानां दृग्दृश्ययोरेवान्तर्भावात्, तौ द्वावेव तत्पदार्थवाचिनाविति निरूपयति। तत्पदार्थनिरूपणस्यावश्यकता केति विचार्य तत्पदार्थप्रकाशनं विना वक्ष्यमाणतत्त्वमस्यादिमहावाक्यार्थासम्भवात् तन्निरूप्यत इति दृक्पदार्थं तर्कसङ्गतं विचारयति। चतुर्थे परिच्छेदे दृश्यं सम्यक् प्रकाश्यते। तच्च अव्याकृत–अमूर्त्त–मूर्त्तभेदेन त्रेधा विभज्य साभासाऽविद्या चैतन्यतादात्म्यापन्ना मूर्त्तामूर्त्तप्रपञ्चबीजरूपा भवतीति सरलं शास्त्रीयं च प्रतिपादयति। पातञ्जलोक्तमष्टाङ्गयोगं विनापि वेदान्तविचारेण श्रवणादिपूर्वकेण कैवल्यमिति भगवत्पतञ्जलिकृताम् आर्यापञ्चाशीतिकामेव प्रमाणत्वेनोद्धृत्य अभिनवं निष्कृष्य ग्रन्थपूर्तिं विदधाति।

अनेनैव ग्रन्थकर्त्रा स्वरूपनिर्णय इत्यपि ग्रन्थो विरचितः। यद्यपि बूलरवर्यः स्वीये केटलोगस् केटलोगोरम् इत्याख्ये स्वरूपप्रकाशः स्वरूपनिर्णय इति ग्रन्थद्वयमपि समानमेव शीर्षकं परं भिन्नमिति उल्लिखति, तन्न सत्यमिति ग्रन्थस्यास्य सम्पादकेन आमुखे प्रस्तूयते। तत्र च वयं प्रमाणमुत्पश्यामो यद् विस्तरस्तु स्वरूपनिर्णये इति दिक्, विस्तरस्तु स्वरूपनिर्णये, तदन्ते च अतिविस्तरस्तु स्वरूपनिर्णयेऽनुसन्धेय इति दिक् इत्यादिग्रन्थम्।

एतस्य ग्रन्थरत्नस्य साधीयसा प्रकारेण महता श्रमेण उपलब्धामेकां मातृकामाश्रित्य सम्पादनं कृतवन्तः शोधात्मकामुखं च विलिख्य ग्रन्थं विभूषितवन्तः प्राच्यप्रातीच्यविद्यासु निष्णाता अनुसन्धानैकदृष्टिमन्तो देशे विदेशे च स्वीयानुपमपाण्डित्यप्रकर्षेण प्रथितयशस आचार्य गयाचरण-त्रिपाठिवर्याः। अमीभ्यः सनमोभणितिं कृतज्ञतावचांसि वितीर्यन्ते।

प्रकाशनकर्मणि साहाय्यं कृतवद्भ्यः सर्वेभ्यः सम्यक् मुद्रणं विधायोप-कृतवते च साधुवादान् वितरामः।

नवदेहली **राधावल्लभः त्रिपाठी**
२१.०७.१०

Introduction

This small but very valuable tract of Advaita Vedānta having *Svarūpaprākaśa* as its title, is being presented to the scholars for the first time. It has Sadānanda Yati for its author who mentions with great reverence Brahmānanda Yati as his spiritual preceptor in the colophons appended to the end of each chapter, as well as in the concluding verse of the work. This Sadānanda Yati belonged to Kashmir and is totally different from the author of *Vedāntasāra*, one of the most popular and well known text of Advaita Vedānta which has 'Sadānanda Yogīndra' as its author and who mentions Advayānanda as his preceptor in the 2nd verse of the Vedāntasara.[1] Further, the *Vedāntasāra* of Sadānanda is an older work and was composed during the early years of the 16th Century (1500-1525 C.E.)[2] whereas our

---

1 अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति॥

2 This is presumed mainly on the basis of a statement of Nṛsiṃha Yogī who wrote the commentary *Subodhinī* on the Vedāntasāra in the year 1588 C.E. and who refers to Sadānanda yogīndra as his 'Paramaguru' (इयता प्रबन्धेन प्रतिपादितेऽस्मिन् वेदान्तसाराख्ये ग्रन्थे श्रीमत्परमगुरुपरमहंसपरिव्राजकाचार्य-सदानन्दयोगीन्द्रेण महापुरुषेण). For the date of *Subodhinī*, cf. the

Svarūpaprakāśa is probably a work of the mid-seventeenth century (i.e. 1650 CE or so) since the last work that it takes note of and refers to is the *Vedāntaparibhāṣā* of Dharmarāja Adhvarīndra composed in 1615 C.E.

The preceptor of Sadānanda, Brahmānanda Yati or 'Brahmānanda Sarasvatī (as mentioned in the final colophon), was also known as Tāraka Brahmāśramī and has contributed at least two works to the rich literature of Vedānta, namely: *Upaniṣadarthasārasaṃgraha* and a commentary called *Saṃgraha* (collection, compilation, précis from different sources) on the *Parimala* of Appaya Dīkṣita. Our author describes him as *Paramahaṃsa-parivrājakācārya* which shows that he was a recluse, not living as a *gṛhastha* or householder and refers to him with the honorific term *bhagavatpūjyapāda* - a term which is generally reserved for Ādi-Śaṅkarācārya in Advaita Vedānta.

---

commentator's own statement at the end of the commentary where he mentions that he completed it in the Śaka year 1510 :

जाते पञ्चशताधिके दशशते संवत्सराणां पुनः
संजाते दशवत्सरे प्रभुवरश्रीशालिवाहे शके।
प्राप्ते दुर्मुखवत्सरे शुभशुचौ मासेऽनुमत्यां तिथौ
शुभ्रे भार्गववत्सरे नरहरिष्टीकां चकारोज्ज्वलाम्॥

See the *Vedāntasāra* of Chowkhamba Vidyābhavan edition with two commentaries (in Sanskrit and Hindi respectively.) titled *Bhāvabodhanī*, Pp.20-21.

Our author seems to be an excellent scholar of the discipline of Advaita Vedānta. He had command over a great number of authoritative texts of this field and had pursued them with great care. Explaining the motive behind composing this work, he states at the very outset of the work that "in order to explain the difference between Self and Non-self, sages like Vedavyāsa composed the *Brahmasūtras* which were commented upon by Śaṅkara and Sureśvara etc.; but since those texts are very lengthy, terse and difficult to understand for persons having average intelligence and intellectual capacity, I am summarizing their content in a simpler form in order to help such people comprehend their essence easily". The author fulfills his *pratijñā* very well in the ensuing pages and the work wonderfully condenses the main views of the great works on Advaita Vedānta.

Svarūpaprakāśa is divided into four sections (*pariccheda*) which the author names as the following:

1. Ātmatattvaprakāśanam
2. Tvaṃ-padārthaprakāśanam
3. Tat-padārthaprakāśanam
4. Jīvabrahmaiśvaryaprakāśanam

In the colophons at the end of each section, he also describes in short what he has dealt with in

that particular section. Thus at the end of the first section he says that in this section his aim has been to show that there exists an Ātman which is separate and independent of all the three gross bodies. He has also refuted the opinions of the philosophers who either do not believe in the separate existence of an Ātman or have a different concept/notion about it. (इतरदर्शनमतनिराकरणपूर्वक-शरीरत्रयविवेकात् पृथगात्मतत्त्वप्रकाशनम्). In the second section he dilates upon the concept of *Tvam* ('you') which stands for individual consciousness in Advaita-Vedānta and also the whole process of its becoming the worldly individual being or Jīvātman (सपरिवार-त्वं पदार्थप्रकाशनम्). The section also deals with the theory of *dṛṣṭi-sṛṣṭivāda*. The third section is very important. As stated above, the author sets up as his goal a description of the nature of *Tat* or the Supreme consciousness in this section. But this Supreme consciousness for him is not the Brahman of Ādvaita Vedānta but the highest and the unqualified form of Viṣṇu. According to him it is the *Bhakti* (devotion) which is the best means to attain Jñana which leads to the ultimate goal, the *summum bonum*, sought after by every individual being. The Bhakti, on the other hand, is attained through a certain category of actions, especially through desireless Karmans as prescribed in the Bhagavadgītā (तत्त्वज्ञानसाधनत्वेन भगवद्भक्ति-तत्साधनविहितकर्मनिरूपणपूर्वक-भगवत्तत्त्वनिरूपणेन

तत्-पदार्थ प्रकाशनम्): " The last section is devoted to the process of attaining *mokṣa* or final liberation which is achieved by destruction of the individual ignorance (ajñāna, māyā) through self-realisation. With the attainment of *mokṣa* the Jīva acquires the nature and powers (*aśvarya*) of the Supreme (दृश्यपदार्थप्रकाशनपूर्वक-जीवब्रह्मैश्वर्यप्रकाशनम्). In this section the author also extensively deals with the eightfold path of Yoga (*aṣṭāṅgayoga*) leading to *asamprajñāta samādhi* which also ultimately results in merger of individual consciousness into Supreme Consciousness, but puts forward the opinion that it is something inferior to self-realization or true knowledge and that a Jīvanmukta treading on the path of Advaita does not need it.

The doctrine of Vedānta propounded by Sadānanda in this work cannot strictly be called *Ādvaita Vedānta* in the sense Ādi Śaṅkara understood or explained it. It is a slightly diluted form of the views of the standard texts like *Advaitasiddhi*, *Brahmasiddhi* and *Pañcadaśī* etc.

The 'Ādvaita' Vedānta of the 16th - 17th Century is very often profusely mixed up with the element of *bhakti*, directed either towards Viṣṇu or towards Śiva. Same is the case with the Śivādvaita of Kashmir which is much earlier in this respect. The author of our work has 'Para-vāsudeva' of the Vaiṣṇava-Pāñcarātra system in

mind when he conceives of the Supreme Power of the universe. This Para-vāsudeva is, of course, the absolute, non-qualified, abstract form of Viṣṇu identical with Para-brahman of Śaṅkara and others.

It may be pointed out here *en passant* that along with a strong current of Śiva -bhakti there was also a sizable population of the devotees of Viṣṇu in Kashmir to whose existence an impressive number of Vaiṣṇavite sculptures and the earliest Pāñcarātra texts, believed to have been composed in Kashmir (eg. *Ahirbudhnya - Saṃhitā*) by scholars bear eloquent testimony.[3]

It is rather striking that though the author is known as the 'Kashmirian' (*Kāśmīrika*) Sadānanda, which is his distinguishing mark and which shows that he must have had connections with Kashmir, yet nowhere in this work does he quote or mention any work of Kashmir Śaivism which is also basically non-dualistic and perhaps nearest to the Ādvaita of Śaṅkara. However it must be conceded that his use of the terms like *Svacchanda* (for Jīva!), *Kriyāśakti* and *Jñānaśakti* etc. in the beginning of the 4th Chapter may

---

[3] See *Vaiṣṇava Art and Iconography of Kashmir* by B .L . Malla (Delhi, 1996) and Otto Schrader, *Introduction* to *Pāñcarātra and th Ahirbudhnya Saṃhitā* (Adyar, 1919), V. Varadacharya 's Introduction to the recent edition of the *Īśvara Saṃhitā*, (Delhi 2007) Vol .I, Pp .320 -328 .

point towards his basic knowledge of the Śivādvaita of Kashmir .

The blending of Viṣṇu-bhakti and Advaita Vedānta started most probably in the centuries immediately following the movement of Āḷwārs in South. Besides *Viṣṇu -purāṇa.* (5th Century), the *Śrīmad -bhāgavata -purāṇa* is the earliest and at the same time the foremost example of this phenomenon which seems to have been composed sometime during the 6th to the 8th centuries C.E. Whether it is pre-śaṅkara or post-śaṅkara, it is difficult to say. Śaṅkarācārya never refers to it in his Bhāṣya though he could have done it with advantage. However there are scholars who claim to have detected some oblique references to Bhāgavata in the writings of Śaṅkara.

The intermingling of Bhakti with Upanishadic Vedānta is a unique phenomenon of Indian religious history. Whereas the former presupposes the existence of a personal God — merciful and omnipotent, the latter lays stress on the impersonal, abstract and absolute character of the Supreme . Whereas the school of Bhakti is essentially dualistic in nature and believes in the fundamental difference between the individual soul and God whom it wants to serve and achieve through love and devotion, the monistic Vedānta of the Upaniṣads and Śaṅkara vehemently propagates the doctrine of non-duality between individual and universal

soul and declares that both are one and the same, the difference being totally unreal created by ignorance. Yet, in spite of this fundamental difference, which initially seems to be impossible to be bridged over, there have emerged quite a number of schools which have created their system out of a fine blend of both. We have a good number of the schools of Viṣṇuism, which consider themselves to be a part of Vedānta (Viṣiṣṭādvaita, Śuddhādvaita etc .) although strongly advocating devotional service unto Viṣṇu who has both a personal (lower) and an impersonal (higher) character. The Śaivites following the tenets of Kashmir Śaivism also fall in the same category. On the other hand, there has been a strong movement to deny this personal character of the Supreme being (God), to consider him as an impersonal and abstract Entity but at the same time to have a strong feeling of devotion and emotional attachment to Him and to try to approach him through enlightened knowledge and through self- realization . This is the *Nirguṇa -bhakti* of Kabir, Dādū and Nānak etc . and the whole structure of Sikhism is based on this notion. Great Vedāntic scholars like Madhusūdana Sarasvatī (author of *Brahmasiddhi*, 16th c.) of Varanasi were simultaneously also great devotees of Kṛṣṇa; and the poet Tulasidāsa, the great Rāma -bhakta belonging to the same place and writing in the same century also declares that there is no difference between Bhakti and Jñāna; both of these paths follow the same goal

of destroying the '*saṃsāra*' and lead the Sādhaka towards final liberation:

ज्ञानहिं भक्तिहिं नहिं कछु भेदा।
उभय हरहिं भवसंभव खेदा॥

One should not wonder, therefore when in the third section of the *Svarūpaprakāśa* our author suddenly seems to go a little off-track and starts equating Viṣṇu (i .e . his impersonal and transcendental form) with the Para -brahman, the Supreme Consciousness. Apart from this, however, his work tries to follow the tenets of Advaita in a faithful manner.

Svarūpaprakāśa is not the only work of Sadānanda Yati . It is also not his first work . Before attempting this work, he had authored at least one more work' titled *Svarūpanirṇaya* to which he refers very often in this work . This *Svarūpa -nirṇaya* is yet to be discovered and brought to light . When Bühler compiled his *Catalogus Catalogorum* in 1891, neither of these works were available. He, therefore, opined that both the works are one and the same, they bear only two different titles. However, we now conclusively know that it is not true.

Our author Kashmīrika Sadānanda was definitely a widely learned man . He must have studied quite a number of Vedantic works along with other texts at the feet of his master and

preceptor. He quotes by name the following *forty* works in the Svarūpaprakāśa :

वैदिकग्रन्थाः उपनिषदश्च

आश्वलायनसंहिता

बृहदारण्यक-उपनिषद्

- उषस्तब्राह्मणम्

- पैङ्गिरहस्यब्राह्मणम्

छान्दोग्य - उप०

तैत्तिरीय - उप०

श्वेताश्वतर- उप०

मुण्डक - उप०

माण्डूक्य - उप०

कैवल्य - उप०

पुराणाानि

मत्स्यपुराणम्

पद्म पु०

विष्णु - पु०

भागवत - पु०

नारदीय - पु०

बृहन्नारदीय - पु०

स्कन्द - पु०

भविष्य - पु०

सौर - पु०

पञ्चपादिकोपरिविवरणाख्यटीकाया उपटीका)

वेदान्तग्रन्थाः

गौडपादीयमाण्डूक्यकारिका

माण्डूक्यकारिकाभाष्यम् (शंकर)

ब्रह्मसूत्राणि (बादरायण)

शारीरकभाष्यम् (शंकर)

भामती (वाचस्पतिमिश्र)

बृहदारण्यकश्लोकवार्त्तिक (सुरेश्वराचार्य)

ब्रह्मसिद्धि : (मण्डनमिश्र)

वेदान्तकौमुदी (रामद्वय)

खण्डनखण्डखाद्यटीका (चित्सुखाचार्य)

तत्त्वप्रदीपिका(' चित्सुखी ', चित्सुखाचार्य)

तात्पर्यदीपिका (पद्मपादाचार्यकृत-

सिद्धान्तलेश : (अप्पयदीक्षित)

तत्त्वशुद्धि : (ज्ञानघन)

पञ्चदशी (विद्यारण्य)

गूढार्थदीपिका (मधुसूदनसरस्वती)

अद्वैतसिद्धि : (मधुसूदनसरस्वती)

परिमल (वेदान्तदीक्षित)

अद्वैतमकरन्द : (लक्ष्मीधर)

योगवासिष्ठम्

शास्त्रदर्पणः

आर्यापञ्चाशीति : (पतञ्जलि) (?)

वेदान्तपरिभाषा (धर्मराजाध्वरीन्द्र)

विविधाः

भगवद्गीता

प्रभाकरो मीमांसकः स्मृतिः (?)

शिवमहिम्नःस्तवः

स्मृतिः (?)

It is obvious that he must have read and/or consulted other texts also from where he has culled matter for writing this work, for example, his treatment of Aṣṭāṅgayoga in the fourth section betrays his good acquaintance with the *Vyāsabhāṣya* on the *Yogasūtras* of Patañjali though he never refers to Vyāsa by name.

The language of Sadānanda Yati is flawless and lucid and it closely follows the standard prose works of the discipline. His style is direct and simple and his treatment of subject is coherent and logical. He does not usually take recourse to the terminology of Navyanyāya to explain definitions of the technical terms used by him and wherever he does it, it is quite transparent and easily intelligible. The work thus can serve as a good step-in into the rich literature of Vedānta ' .

It has some marked differences too in the treatment of the subject matter in comparison to the works of similar nature. Take, for example, the case of the '*Vedāntasāra* ' of his namesake Sadānanda Yogīndra of the 16th Century, which he does not appear to have seen. Whereas the *Vedāntasāra* deals very extensively with the nature of Māyā, its two 'Saktis ' (*āvaraṇa*, *vikṣepa*), the twofold parallel development of the universal and the individual consciousness, process of the gradual emanation of creation on the line of Pañcīkaraṇa, the procedure of gradual self-realization by attaining enlightenment through a '*tadākārā vṛtti*' after the Preceptor has duly explained the true meaning of the Mahāvākya '*tattvamasi*' with the help of *Jahadajahad -lakṣaṇā*, the Svarūpaprakāśa goes the

direct way of attaining self realization through the true knowledge generated by *bhakti* combined with *vairāgya* by leading a life full of strict self-discipline according to the ethical norms and values prescribed in the Dharmasśāstras .

The editing of this work has been done on the basis of one single manuscript deposited in the Ganganatha Jha Kendriya Sanskrit Vidyapīṭha, Allahabad and bearing the Catalogue No.781/63 . The manuscript was purchased from a collector of manuscripts living in Varanasi during my tenure there as the Principal of this Vidyāpīṭha . It is a paper manuscript, complete and well written, is undated, however seems to have been prepared between 1700 to 1750 C.E. Those who have reconstructed a text on the basis of one single manuscript know well the labour and the difficulties involved in such a task. There were quite a number of scribal mistakes, besides wrong readings caused by errors in understanding the text by the scribe, which had to be rectified assiduously. In some cases where the text was unintelligible or short by one or two words, the *lacunae* had to be filled up and occasionally *emendationes* had to be carried out. It has thus taken very long time to restore the text in a more or less readable and presentable form. Although the work presented here cannot be termed as a critical edition of the text, yet I have some satisfaction of bringing a hitherto unknown text to light and an unknown author to life. The search must now go on for the other work of the author, the *Svarūpanirṇaya*, which seems to be a companion volume to this work being referred to quite frequently throughout the text. The author skips over

a number of topics or deals with them very succinctly while asking the reader to refer to his earlier work for detail. The *Svarūpanirṇaya* and *Svarūpaprakāśa* are thus volumes 1 & 2 of one and the same work, so to say.

My attention to this work was drawn by Km . Archanā Chaturvedi of our Institute who had started copying it out but could not complete it because of her quite untimely and sudden death.

My father Dr . Ram Sharan Tripathi (of the Dept . of Sanskrit, K .G .K . College, Moradabad) was the first scholar to translate the *Vedāntasāra* of Sadānanda into Hindi, along with supplying an erudite Sanskrit commentary titled *Bhāvabodhani* to the text. The text along with these two commentaries was published as No .1 of the Vidyābhavan series by the Chowkhamba Sanskrit series office of Varanasi in early 1954 and has since run into dozens of genuine and pirated reprints. I am very happy that God has given me the opportunity to publish this *Svarūpaprakāśa* of another Sadānanda as the first person and hope that when more Mss of this work become known some day, some other scholar would work out a critical edition of the text and write a detailed exposition of its philosophy. I had originally planned an English translation of the text but under the present circumstances when I am too preoccupied with administrative and academic work of various sorts in the Institute, I reluctantly postpone it to some more favourable times in future.

Acknowledgements

I gratefully and thankfully acknowledge the kind help of all my previous and present colleagues who have contributed their valuable time and energy to make this work see the light of day possible.

The first and foremost among them is Km . Ritu Kumari, the Hindi Translator of our Division who has toiled for long hours to type out this difficult work in computer, to make corrections and to format it in aesthetically the most appealing form. Then, Smt . Renu Sharma, P .A. of the Division who is always a great help and support to me as P. S . and who has typed the English portion of the Introduction. Dr . Sher Singh Dogra, our Designer has lent his technical know -how and help in formatting the text and designing it properly.

I give my blessings to all of them .

अथ श्री काश्मीरिकसदानन्दविरचितः

स्वरूपप्रकाशः

प्रथमः परिच्छेदः

॥ आत्मतत्त्वप्रकाशनम् ॥

यस्मिन् बुद्बुदवद्विश्वं भिन्नाभिन्नमिव स्थितम्।
तं वन्दे परमानन्दं तुरीयं साक्षिणं सदा ॥

इह खलु सकललोकहितैषी भगवान् वेदव्यासो मुमुक्षूननात्मभ्यो विवेकेन नित्यशुद्धबुद्धमुक्तस्वभावमात्मानं बोधयितुं सूत्राणि प्रणिनाय। तेषु च श्रीमच्छंकरसुरेश्वराद्याचार्याः भाष्यवार्तिकादिरूपान्निबन्धान् निबबन्धुः। तेषां चातिविस्तृतत्वान् मन्दबुद्धीनां दुरवगाहत्वाच्च न सहसा तेभ्य आत्मानात्मविवेकः सम्भवतीति तदनुग्रहाय तानेवाश्रित्य संक्षेपेण स्वरूपं प्रकाश्यते।

तत्र स्वप्रकाशपरमानन्दरूपे आत्मनि सर्वसंसारधर्मासंसर्गिणि स्थूलसूक्ष्मशरीरद्वय-तत्कारणाविद्याख्योपाधित्रयविवेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वप्रतिभासो बन्धः, तन्निवृत्तिस्तु मोक्षः। तदुक्तं **भगवता भाष्यकारेण** -

अनात्मभूते देहादावात्मबुद्धिस्तु देहिनाम् ।
साऽविद्या यत्कृतो बन्धस्तन्नाशो मोक्ष उच्यते ॥

उक्तं च **वार्तिककृद्भिः** -

प्रत्यग्याथात्म्यसम्मोहाज्जगत् सदिति भासते।
प्रत्यग्याथात्म्यसंबुद्धौ न सत्तन्नासदुच्यते ॥ इति

ननु कथं स्वप्रकाशपरमानन्दस्यात्मन अज्ञानकल्पनम् । न हि मध्याह्नमार्तण्डे अन्धकार इति सम्भावयितुमपि शक्यमिति चेत् , न। मध्यन्दिनवर्तिनि स्वप्रकाशे सवितरि दिवान्धैरुलूकादिभिरन्धकार-कल्पनादर्शनात् । एवं तत्त्वज्ञानात्[1] प्रागपि आत्मानमहं न जानामीति प्रतीत्या अनिर्वाच्यमज्ञानं कल्प्यत इति किमनुपपन्नम् ? अथ कथं निर्धर्मके आत्मनि जीवेश्वरादिविभागः, कीदृशं वा शरीरत्रयविवेकात् पृथगात्मतत्त्वज्ञानमिति चेद्, उच्यते ।

अत्र वक्ष्यमाणमायोपहितचैतन्यमीश्वरः। अन्तःकरण-तत्संस्कारावच्छिन्नाविद्याप्रतिबिम्बीभूतं चैतन्यं जीवः। अविद्यावच्छिन्नं वा चैतन्यं जीवः। अत्र चान्तःकरणनानात्वात् जीवनानात्वम् , न तु वास्तवम्, अविद्यानानात्वाद् वा। न चात्र मानाभावः शङ्कनीयः। माया भासेन जीवेशौ करोति *'रूपं रूपं प्रतिरूपो बभूव' 'तदस्य*[2] *रूपं प्रतिचक्षणाय' 'इन्द्रो मायाभिः पुरुरूप ईयते'*इत्यादि श्रुतेः। *'एक एव तु भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवद्'* इति स्मृतेश्च। *'बहुरूप इवाभाति मायया बहुरूपया'*इति च।

न चोपाधिकृतभेदे वास्तवाभेदे च सति कथं किञ्चिज्ज्ञत्वसर्वज्ञत्वा-दिव्यवस्थेति वाच्यम् । दर्पणस्य मुखत्वावच्छिन्नमुखमात्रसंबन्धित्वेऽपि

---

१. तत्त्वम् अनारोपितं रूपम् । ज्ञानंप्रमाणगत प्रमेयगतासंभावनाविपरीतभावनारहितत्वे सति साक्षात्कारत्वम्।

२. तत्प्रतिबिम्बत्वमस्यात्मनो निरुपाधिकस्य रूपं स्वरूपं, प्रतिचक्षणाय आत्मयाथात्म्य प्रतिख्यापनाय, शास्त्राचार्यादिभेदेन तत्त्वप्रकाशनायेत्यर्थः।

प्रतिमुखे मालिन्यवत् प्रतिबिम्बे जीवे किञ्चिज्ज्ञत्वादिसंसारः,न बिम्बे ब्रह्मणि। उपाधेरेव प्रतिबिम्बपक्षपातित्वात्। पक्षपातित्वं तु प्रतिबिम्बे उपाधिगतधर्मारोपकत्वम्[३]। एवं संक्षेपेण जीवेश्वरविभागं प्रकाश्य जीवोपाधेरेकत्वेऽप्यवान्तरभेदमाश्रित्य जीवस्य त्रैविध्यं विस्तरेण प्रपञ्च्यते। तत्राविद्यान्तःकरणस्थूलशरीरावच्छिन्नो जाग्रदवस्थाभिमानी विश्वः। स च देहेन्द्रियादिषु प्रवेशाद् व्यापनाद् वा विश्व इत्युच्यते- *विश्* प्रवेशने, *विष्लृ* व्याप्ताविति स्मरणात् । स इह प्रविष्टः आनखाग्रेभ्यः *'तत् सृष्ट्वा तदेवानुप्राविशत्' 'सच्चासच्चाभवदि'*ति श्रुतेश्च ॥

जाग्रदवस्था तु इन्द्रियवृत्तिसमकालीनार्थोपलम्भः, भोग्यं चात्र वक्ष्यमाणं विराडाख्यम् । प्रत्यक्षादिप्रमाणषट्केन व्यवह्रियमाणत्वाद् व्यावहारिकं विश्वाख्येन जीवेनोपयुज्यते। व्यावहारिकश्चतुर्विधः अभिज्ञोपादानमभिवदनार्थक्रियाभेदात्। व्यावहारिकत्वं तु ब्रह्मज्ञानेतरा-बाध्यत्वे सति ब्रह्मज्ञानबाध्यत्वम् । बाध्यत्वं तु प्रतीयमानत्वे सति अधिष्ठानातिरिक्तस्वरूपशून्यत्वम् । बाधकर्मत्वमिति यावत्। बाधस्तु उपादानेन सह कार्याप्रतीतिः। तदुक्तम् —

साक्षात्कृते त्वधिष्ठाने समनन्तरनिश्चितिः ।
अध्यस्तमानं नास्तीति बाध इत्युच्यते बुधैः॥ इति।

इदं तु चतुर्थपरिच्छेदे स्पष्टं भविष्यतीति।

---

३. दृष्टान्ते दर्पणाद्युपाधितद्गतवक्रत्वमलिनत्वादिदार्ष्टान्तिके तु अविद्यान्तःकरणरागादिगत-रागादिदोष एव धर्म इत्यर्थः ॥

ब्रह्मज्ञानेतरबाध्यत्वे सति ब्रह्मज्ञानाबाध्यत्वं पारमार्थिकत्वम्। ब्रह्मज्ञानेतरबाध्यत्वं तु प्रातिभासिकत्वम्। अथवा अविद्यातिरिक्त-दोषाजन्यत्वं[४] व्यावहारिकत्वम्, अविद्यातिरिक्तदोषजन्यत्वं तु प्रातिभासिकत्वम्। तदुभयाधिष्ठानत्वं तु पारमार्थिकत्वमिति विवेकः।

अत्र यद्यपि विश्वेन वक्ष्यमाणममूर्तमव्याकृतं चानुमानादिनानभूयते तथापि व्यावहारिकं सर्वं विश्वेनैव ज्ञायत इति नियमात्। विशेषतः स्थूलशरीराभिमानित्वाच्च न तस्यावस्थान्तर-व्यापकत्वम्। न च शुक्तिरजतादिज्ञानानां प्रातिभासिकत्वेन कथं जागरणत्वमिति वाच्यम्। तद्विषयस्याव्यावहारिकत्वेऽपि इन्द्रियवृत्ति व्यापार-कालीनत्वाज्जागरणत्वोपपत्तिः। एवं जाग्रद्भोगजनककर्मक्षये सति स्वप्नभोगजनककर्मोदये च सति निद्राख्यया तामस्या वृत्त्या स्थूलदेहाभिमाने दूरीकृते सर्वेन्द्रियेषु देवतानुग्रहाभावात् स्वस्वगोलकेषु निर्व्यापारतया लीनेषु सत्सु स एवोपाधिद्वयोपहितः स्वप्नावस्थाभिमानी तैजसः, आदित्यादिज्योतिरन्तरेणापि भासकत्वात्। स्वप्नावस्था तु इन्द्रियवृत्त्यभावलीनार्थोपलम्भः। करणेषूपसंहृतेषु जाग्रत्संस्कारजः प्रत्ययः सविषयो वा।

ननु स्वाप्निकपदार्थानां किमुपादानमविद्या उत मनोगतवासना ? उच्यते। स्वाश्रयविषयावरणविक्षेपशक्तिमती अविद्यैव शुक्तिरजतादिवत् स्वप्नार्थाध्यासकारेण परिणमते, ज्ञायते चा विद्यावृत्त्यैव इत्येके। अत्र चाविद्यापेक्षया परिणामः, चैतन्यापेक्षया विवर्तः। एतयोर्लक्षणम्-तात्त्विकोऽन्थाभावः परिणामः, यथा सुवर्णस्य कुण्डलादि। अतात्त्विकोऽन्यथाभावो विवर्तः। यद्वा अवस्थान्तरापत्तिः परिणामः,

४. अविद्यातिरिक्तदोषस्तु आरोप्यजातीयसंस्कारः प्रमातृनिष्ठः, काचकमालादिवद् इन्द्रियनिष्ठः, चाकचक्यादिवद् विषयनिष्ठ इत्येतद् दोषत्रयजनितं प्रातिभासिकमित्यर्थः ।

अवस्थान्तरभानं तु विवर्तः। तदुक्तं –*'अवस्थान्तरभानं तु विवर्तो रज्जुसर्पवत्'*।

मन एव गजतुरगाद्याकारेण परिणमते, अविद्यावृत्त्या च ज्ञायत इत्यपरे॥

अत्र द्वितीयस्य गौरवेण अविद्याया एवादृष्टसहकारेण सर्वत्रार्थाध्यासज्ञानाध्यासोपादानत्वं कल्प्यते, लाघवात्। उपादानत्वं तु कार्याभिन्नकारणत्वम्। अध्यासलक्षणं तु 'सत्यानृते मिथुनीकृत्ये'ति **भगवद्भाष्यकार**वचनात् सत्यानृतवस्तुसम्भेदानवभासोऽध्यासः। स च द्विविधोऽनादिसादिभेदेन। तत्र अविद्याध्यासस्तु एक एव अनादिः।

अविद्याध्यासो नाम चिन्निष्ठाविद्यासंबन्धः। एकः अहंकारानवच्छिन्नः अनादिरनुत्पन्नः। द्वितीयस्तु पूर्वपूर्वाध्यासमूल एवायमुत्तरोत्तराहंकाराद्यध्यासो बीजाङ्कुरादिवददृष्टादित्वेऽपि सादिः। यद्वा परत्र परावभास इत्येतावन्मात्रस्यैवोभयानुगतस्य लक्षणत्वात्। परत्र रजतभिन्ने इदंपरस्य इदंभिन्नस्य रजतस्यावभासोऽध्यास इत्यर्थः। न चात्रात्माश्रयादिदोषः शङ्कनीयः। अनादित्वेनैव तन्निरासात्। स्वप्रकाशात्मन एव तज्ज्ञानाच्चेति दिक्[५]।

न च तर्हि शास्त्रे मनः परिणाम इति व्यपदेशो व्यर्थ इत्युच्चैर्वाच्यम् मनोगतवासनानिमित्तत्वे न तथात्वोपपत्तेः। न च तदा मनसो दृश्याकारपरिणामानभ्युपगमे द्रष्टृत्वसम्भवेनात्मनस्तदानीं स्वयंज्योतिष्ट्वासिद्धिरिति शङ्क्यम्, वक्ष्यमाणबहिरिन्द्रियवृत्त्यभावेन तदानीं मनसोऽग्राहकत्वात् सवृत्तिकान्तःकरणावच्छिन्नचैतन्यस्यैव प्रमात्रभावाद् द्रष्टृत्वाभावः॥

---

५. आत्मानात्माध्यासस्यात्माश्रयादिः किमुत्पत्तौ ज्ञप्तौ वा तत्राद्यं निराकरोति 'अनादित्वेने'ति द्वितीयं निराकरोति 'स्वप्रकाशात्मन' इति ।

अथ किमधिष्ठानं स्वप्नभ्रमस्येति चेत् , शृणु। मनोऽवच्छिन्नं जीवचैतन्यमित्येके, मूलाज्ञानावच्छिन्नं ब्रह्मचैतन्यमित्यपरे। तथा हि - जाग्रद्बोधेन स्वप्नभ्रमनिवृत्तिदर्शनात् भ्रमनिवृत्तिं प्रति हि अधिष्ठान-विशेष[६]ज्ञानस्य कारणत्वात् तच्च मूलाज्ञानावच्छिन्नं ब्रह्मचैतन्यस्य संसारकाले न सम्भवतीति, जीवचैतन्यमेवाधिष्ठानम् । यदि पुनर्ब्रह्मज्ञानादेवाज्ञाननिवृत्तिस्तदा रज्ज्वां दण्डभ्रमेण सर्पभ्रमतिरोधान-वदधिष्ठानज्ञानाभावेऽपि जाग्रद्भ्रमेण स्वप्नभ्रमतिरोभावोपपत्तेः। तथा च मूलाज्ञानावच्छिन्नं ब्रह्मचैतन्यमेव स्वप्नाध्यासाधिष्ठानमिति पक्षेऽपि न कोऽपि दोषः। न च भवत्येवं द्वितीयपक्षे जीवचैतन्यस्य तु सर्वदा भासमानत्वेनावृतत्वाद् अधिष्ठानत्वासम्भव इति वाच्यम्, स्वप्नाध्यासानुकूल-व्यावहारिकसंघातभानविरोध्यवस्थाज्ञानस्य तत्राभ्युपगमात्। न च तत्राप्यहं मनुष्य इत्यादिप्रतीत्या व्यावहारिकसंघातभानमस्त्विति वाच्यम्। स्वप्ने चाहं मनुष्य इत्यादि प्रातीतिकसंघातान्तरभानाभ्युपगमात् शय्यायां स्वपिमीति शय्यान्तरज्ञानवत्। न च शय्यांशे भानसामग्र्यभावाद् भानासम्भवो युक्त इति वाच्यं, भानसामग्र्यभावस्योभयत्र[७] तुल्यत्वात् ॥

ननु तर्हि व्यावहारिकसंघातज्ञानेनावस्थाऽज्ञानस्य नष्टत्वात् कदापि स्वप्नभ्रमः पुनर्न स्यादिति चेत् न। यावन्ति ज्ञानानि तावन्ति अज्ञानानीत्यभ्युपगमात् , अवस्थाज्ञानानामनेकत्वस्य द्वितीयपरिच्छेदे वक्ष्यमाणत्वात्। तथा च शुक्तिज्ञानेनैव व्यावहारिकसंघातज्ञानेन अज्ञाननिवृत्तावपि पुनरपि कदाचिद् रजतभ्रमवन्न स्वप्नाध्यासानामुप-पत्तिरिति, विस्तरस्तु **स्वरूपनिर्णय** इति दिक्। एवं शरीरान्तःकरणोपाधि-द्वयाभिमानरहितःतत्संस्कारावच्छिन्नोऽविद्यामात्रोपहितः सुषुप्त्ययवस्था-

---

६. अधिष्ठानसामान्यज्ञानं भ्रमहेतुः,रजतभ्रमे इदमंशतया शुक्तिभानाभ्युपगमात्।

७. अहं स्वपिमि' इत्यहमंशशय्यांशयोः ।

भिमानी प्राज्ञः[८]। सुषुप्त्यवस्था तु जाग्रत्स्वप्नभोगद्वयेन परिश्रान्तस्य जीवस्य तदुभयकारणकर्मक्षये सति ज्ञानशक्त्यवच्छिन्नस्य सवासनस्य अन्तःकरणस्य कारणात्मनाऽवस्थाने सति विश्रामावस्थानम् ,यद्वा कारणमात्रोपलम्भः। सुषुप्तिरित्येव संक्षेपेण लक्ष्यमित्यपि केचित् , अवस्थाज्ञानं मनोलयश्चेति वा। तथा च श्रुतिः- *'तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ सँल्लयायैवाध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति' 'यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति'*। सुपर्णः शीघ्रगतिः श्येनः, विपरिपत्य विशेषेण नानादेशेषु पतित्वा, श्रान्तीभूय, पक्षौ संहत्य संयुक्तीकृत्य,लयाय नीडप्राप्त्यर्थं, यतते,आध्रियते एवं पुरुषः अन्ताय उपरतावस्थारूपान्तप्राप्त्यर्थं, धावति यतते।

तत्र जाग्रत्स्वप्नभोग्यपदार्थज्ञानाभावेऽपि साक्ष्याकारं सुखाकारं संस्कारतापन्नजाग्रत्स्वप्नविषयकमवस्थाऽज्ञानतदाश्रयीभूतमूलाज्ञानाकारं चाविद्यावृत्तित्रयमभ्युपेयते, अहंकारस्य च लीनत्वान्नैका विशिष्टवृत्तिः, सुषुप्त्यभावप्रसङ्गात्। वृत्तिरूपस्योपलम्भस्याभावान्न प्रलयेऽतिव्याप्तिः। न च तत्रापि वृत्तिः कल्प्यतामिति साम्प्रतम् तत्र तत्कल्पने कारणाभावात्। न चेहापि कारणाभावः शङ्कितुं शक्यते, 'सुखमहमस्वाप्सम् न किञ्चिदवेदिषम्' इति सुप्तोत्थितपरामर्शस्य सर्वानुभवसिद्धत्वात्। अनुभवानङ्गीकारे परामर्शानुपपत्तेश्च। तदुक्तं वा*तककृद्भि**रुषस्तब्राह्मणे**-

न चेदनुभवव्याप्तिः सुषुप्तस्याभ्युपेयते।
नावेदिषं सुषुप्तोऽहमिति धीः किंबलाद् भवेत् ? ॥

न च स्मृतिरपि न संभवति स्मर्यमाणाहंकारस्य पूर्वम् अननुभवादिति वाच्यम्। अहंकारस्तु उत्थानसमय एवानुभूयते तदानीं लीनत्वात्। न च

८. प्रज्ञा विनाशिस्वरूपाऽनुभवरूपा यस्य स प्रज्ञः । प्रज्ञ एव प्राज्ञः ।

कालदेशविशिष्टरूपतोल्लेखाभावे कथं निर्विकल्पकत्वे केवलाज्ञानादिरूपेण स्मरणमिति वाच्यम्, वक्ष्यमाणान्तः-करणोपराग[१]जन्यानुभवाभावेन तदुल्लेखाभावेऽपि न स्मरणानुपपत्तिः, निर्विकल्पकानुभवजनितसंस्कारस्य निर्विकल्पकस्मरणहेतुत्वात् । न हि निर्विकल्पकस्मरणस्य तत्रोल्लेखः कस्यचिद् अनुभवारूढो जागरेऽपि, किं पुनः सुषुप्तौ। किं च स्मरणे तत्रोल्लेखनियमाभावाच्च। न च नावेदिषमिति प्रत्ययेन ज्ञानाभावानुमितिस्तथाहि स्वप्नजागरयोर्मध्यकालो ज्ञानसामान्याभाववान्, अवस्थाविशेषत्वात् ज्ञानसामग्र्यभावाद् वा मूर्च्छादिवदिति वाच्यम्, हेत्वभावात्। ज्ञानसामग्र्यभावस्यान्योन्याश्रयग्रस्तत्वाच्च। पक्षे ज्ञानसामान्याभावस्य ज्ञातुमशक्यत्वाच्च।

न चाहमस्वाप्समिति प्रत्ययेनाहंकारस्याज्ञानाद्याश्रयत्वेनैव प्रतीतिर्न तु साक्ष्याश्रयत्वेनेति वाच्यम्। मुखप्रतिबिम्बाश्रये दर्पणे जपाकुसुमलौहित्याध्यासेन रक्तं मुखमिति प्रतीतिवद् अहंकाराश्रयसाक्षिचैतन्यस्य स्मरणाश्रयत्वात् सामान्याधिकरण्येन प्रतीतिः। न 'पुनरहं सुखी 'तिवदाश्रयतया स्मृतिसंशयविपर्ययाणां साक्षिचैतन्याश्रयत्वनियमः, अप्रमात्वात्, अहंकारस्यैव वक्ष्यमाणप्रमाणजन्यज्ञानाश्रयत्वात्। अत एवानाप्तवाक्यादिजन्यवक्ष्यमाणापरोक्षविभ्रमोऽप्यविद्यावृत्तिरेव इत्यभ्युपगमो वेदान्तविदां तत्रान्तःकरणवृत्तिजनकसामग्रीसंभवेऽपि प्रमात्वाभावापराधेनान्तःकरणस्यासमर्थत्वात् ॥

ननु तर्हि नामादौ ब्रह्मैक्योपासनापि न प्रमाबाधिता— *'नाम्नि ब्रह्मोपासीत' 'वाचं धेनुमुपासीत'* इत्यादावित्यर्थत्वात्, नापि भ्रमो नामादौ ब्रह्मभेदस्यानावृतत्वात्, तथा चाविद्येव मनोऽपि न तस्यां

---

१. उपरागसन्निकर्ष इत्यर्थः।

परिणामीति चेन्न। कामादिवद्[10]इच्छाधीनतया नामादिषु ब्रह्माध्यासस्य भ्रमप्रमाबहिर्भूतमनोवृत्तिस्वरूपत्वेनैव स्वीकारात्। तदुक्तम्- चोदनाजन्यत्वान्मानसी क्रियैव सा। एतेन 'वह्निव्याप्यधूमवान् ह्रद' इत्यारोप[11]जन्यस्य 'ह्रदो वह्निमान् स्या'दित्याकारकतर्कस्यापीच्छाधीनत्वेन भ्रमप्रमाबहिर्भूतत्वेन मनोवृत्तित्वं व्याख्यातम्। अत एव वक्ष्यमाण-मनननिदिध्यासनसहिते श्रवणाख्ये ऊहापोहात्मके वेदान्तवाक्यविचारे *'श्रोतव्यो मन्तव्यो निदिध्यासितव्य'* इति विधिरुपपद्यते **विवरणाचार्यादि**स्वीकृतत्वाच्च। यदि तु शास्त्राचार्योपदेशजनितं ज्ञानमेव श्रवणं तदा ज्ञाने विध्यसंभवेऽपि न क्षतिः। अत एव सर्वतन्त्र-स्वतन्त्रै**र्वाचस्पतिमिश्रैः** *'श्रोतव्यो मन्तव्य'* इति वाक्ये विधिर्नाङ्गीकृत इति, विस्तरस्त्वाकर इति दिक्।

तदेवं सुषुप्त्यवस्थायामाशयानन्दानुभवः, अनुभविता च सुषप्त्यवस्थाभिमानी प्राज्ञः। तथा च श्रुतिः -*'आनन्दभुक् चेतोमुखः*[12] *प्राज्ञः'*। न च सुषुप्तावन्तःकरणस्य लये जीवाभावप्रसङ्गः इति वाच्यम्। तदानीमपि तत्संस्कारावच्छेदात्। न वा सर्वज्ञापत्तिः।

तदेवं सुषुप्त्यवस्थायामाशयानन्दानुभवः, अनुभविता च सुषप्त्यवस्थाभिमानी प्राज्ञः। तथा च श्रुतिः-*'आनन्दभुक् चेतोमुखः प्राज्ञः'*। न च सुषुप्तावन्तःकरणस्य लये जीवाभावप्रसङ्गः इति वाच्यम्। तदानीमपि तत्संस्कारावच्छेदात्। न वा सर्वज्ञापत्तिः।

---

१०. इदं मे स्यादित्यादि।

११. अत इति तद्वत्ताप्रसञ्जनम् आरोपः ।

१२. चेतः चैतन्यमेव मुखं साधनं यस्य ।

ननु सुषुप्तौ दुःखाभाव एवानुभूयते, न सुखम्, सुखजनकसामग्र्यभावात्। न च जन्यसुखाद्यभावेऽपि स्वरूपसुखं निर्विकल्पकमनुभूयत इति वाच्यम् विषयानन्दातिरिक्तस्वरूपानन्दे मानाभावात्। विषयसुखवत्साधनाद्यभावे कामुकानां निर्वेददर्शनात् । तदुक्तम् —

सुषुप्त्या उत्थिताश्चैवं निर्विद्यन्ते हि कामुकाः ।
वृथेयमन्तरेणैव कामिनीं यामिनी गता ॥
भुक्त्वा तु परमानन्दं तस्य च स्मरणादयम्।
अल्पाक्षसुखहान्यैवं निर्वेदो नोपपद्यते ॥
तत् सुखं विस्मृतं चेत् स्यात् सुखमस्वाप्समित्ययम्।
व्यवहारो न घटते दुःखाननुभवे त्वयम् ।
सुखव्यवहृतिस्तस्मान्न सुखात्मत्वमात्मनः ॥

इत्यादि **जैमिनीयैरिति** चेद्, अध्यात्मविद्यासंस्कारहीनत्वेन भ्रान्तोऽसि। सुप्तोत्थितस्य विषयसुखसामग्र्यभावेऽपि तूष्णीम्भाव-मुखप्रसादादिलिङ्गदर्शनेनानुभूतसुखसंस्कारसंभवात्। न हि सुषुप्तौ स्वरूपसुखानुभवं विना स संभवति, आकस्मिकत्वापत्तेः[१४]। तदुक्तं भगवता **वसिष्ठेन** -

निद्रादौ जागरस्यान्ते यो भाव उपजायते।
तं भावं भावयन् साक्षादक्षय्यानन्दमश्नुते ॥

'निद्रादि'शब्दस्तु अन्तस्याप्युपलक्षकः। न च कथं तादृशं सुखानुभवं विहाय अनर्थावहं घोरं जागरणमिति वाच्यम्, प्राग्जन्मार्जितकर्मप्राबल्यात्। तथा च **कैवल्यश्रुतिः**-

---

१४. कारणाभावात् कार्यापत्तेः ।

पुनश्च जन्मान्तरकर्मयोगात्
स एव जीवः स्वपिति प्रबुद्धः ।

तदुक्तं श्रुतितात्पर्यविद्भिर्**विद्यारण्यैः**-

अज्ञानबिम्बिता चित् स्यान्मुखं[१५] मानन्दभोजने ।
भुक्तं ब्रह्मसुखं त्यक्त्वा बहिर्यात्यथ कर्मणा ॥
कर्म जन्मान्तरेऽभूद्यत् तद्योगाद् बुध्यते पुनः ।
इति कैवल्यशाखायां कर्मजो बोध ईरितः ॥
किञ्चित्कालं प्रबुद्धस्य ब्रह्मानन्दस्य वासना ॥
अनुगच्छेद्यतस्तूष्णीमास्ते निर्विषयः सुखी ॥
कर्मभिः प्रेरितः पश्चान्नानादुःखानि भावयन् ।
शनैर्विस्मरति ब्रह्मानन्दमेषोऽखिलो जनः ॥
प्रागूर्द्ध्वमपि निद्रायाः पक्षपातो दिने दिने ।
ब्रह्मानन्दे नृणां तेन प्राज्ञोऽस्मिन् विवदेत कः ॥

—इति ।

किञ्च, नहि ब्रह्मलोकसुखमप्यनादृत्य सनकादिभिर्नारदादिभिरनु- भूतस्य स्वरूपसुखस्य, ततोऽर्वाक् श्रुतिस्मृत्युक्तसाङ्गोपाङ्गैः कर्मभिस्तत्तत्कर्मफलत्यागेन भगवदनुग्रहसम्पादनद्वारा जनकाजातशत्रु- मुचुकुन्दादिभिः काम्यमानस्य तस्य, विषयलम्पटपामरनिर्वेदमात्रेणापलापः कर्तुं शक्यते। न हि दुःखाभावमात्रमुद्दिश्य तादृशसुखत्यागः सम्भवति, श्रुतिस्मृतिविरोधात्। तथा हि **तैत्तिरीये** भृगुवरुणसंवादे *'आनन्दाद् ह्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्तीति'*। **छान्दोग्ये** सप्तमप्रपाठके सनत्कुमारनारदसंवादे

---

१५. मुखं साधनम् ।

'सुखं वै भगवो विजिज्ञासितव्य इति'। *'यो वै भूमा तत् सुखम्, नाल्पे सुखमस्ति। भूमैव सुखम्। भूमा त्वेव विजिज्ञासितव्य इति'।* *'भूमानं भगवो विजिज्ञास'* इति। *'यत्र नान्यत् पश्यति, नान्यच्छृणोति, नान्यद्विजानाति, स भूमा। अथ यत्रान्यत् पश्यति, अन्यच्छृणोति, अन्यद्विजानाति, तदल्पम्*[१६] *'। यो वै भूमा तदमृतम् । अथ यदल्पं तन्मर्त्यम्'।* *'स भगवन् कस्मिन् प्रतिष्ठितः'* इति। *'स्वे महिम्नीति'।* **बृहदारण्यके** *'प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्माद् अन्तरतरं यदयम् आत्मेति विज्ञानमानन्दं ब्रह्मे'*त्यादि श्रुतिभ्यस्तस्य परमानन्दरूपत्वेनोपदेशात्। न च तर्हि 'कथं सुखमुत्पन्नं नष्टमिति प्रतीति'रिति वाच्यम्। तस्य नित्यत्वेऽपि वक्ष्यमाणधर्मादिजन्य-मनोवृत्तिव्यंग्यतया तदुत्पत्तिविनाशोपचारात्। अज्ञानमात्रव्यवहितस्य तस्य चाप्राप्तस्येव वक्ष्यमाणमहावाक्यार्थज्ञानमात्रादेवाविद्यानिवृत्त्या प्राप्तिरिव भवति इति तदुद्देशेन मुमुक्षुप्रवृत्तिसंभवः॥

नहि विषयसुखमपि स्वरूपसुखादतिरिच्यते। विषयप्राप्तौ सत्यामन्तर्मुखे मनसि स्वरूपसुखस्यैव प्रतिबिम्बसम्भवात् स्वाभिमुखे दर्पणे मुखप्रतिबिम्बवत् ॥ तदुक्तम् -

विषयेष्वपि लब्धेषु तदिच्छोपरमे सति।
अन्तर्मुखमनोवृत्तावानन्दः प्रतिबिम्बति ॥

स्मृतयश्च—

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिंस्थितो न दुःखेन गुरुणापि विचाल्यते ॥

---

१६. तर्कपीडितं तुच्छम् इति यावत् ।

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥
इति कोटिशः। इति दिक्॥

नन्वस्तु सुषुप्तौ स्वरूपसुखानुभवस्तथापि 'दुःखमहमस्वाप्सम्' इति परामर्शेन दुःखानुभवोऽपि दुर्वार इति चेत्, नैवम्॥ तदानीं दुःखसामग्र्यभावात्। शय्यादेरसमीचीनत्वे दुःखमित्युपचारात् तादृश-प्रतीत्युपपत्तिः। अतो दुःखसामग्र्यभावान् न हि जागरेऽपि सामग्रीं विनैव दुःखमनुभूयते, आकस्मिकत्वापत्तेः। न च सुखेऽप्येष प्रसङ्गः, सुखस्य चात्मस्वरूपत्वेन नित्यत्वात्। अस्तु वावस्थात्रयस्य त्रैविध्याङ्गीकारेण सुषुप्तावपि दुःखानुभवः। तथा हि प्रमाज्ञानं जाग्रज्जाग्रत्, शुक्तिरजतादिविभ्रमो जाग्रत्स्वप्नः, श्रमादिना स्तब्धीभावो जाग्रत्सुषुप्तिः। एवं स्वप्ने मन्त्रादिप्राप्तिः स्वप्नजाग्रत्, स्वप्ने मया स्वप्नो दृष्ट इति स्वप्नस्वप्नः, स्वप्नदशायां च यत्किञ्चिदनुभूय जाग्रद्दशायां च तत् कथयितुं न शक्यते तत् स्वप्नसुषुप्तिः। एवं सुषुप्तावस्थायामपि सात्त्विकी या सुखाकारा वृत्तिः सा सुषुप्तिजाग्रत्, तदनन्तरं सुखमहमस्वाप्समिति परामर्शः, तत्रैव या राजसी वृत्तिः सा सुषुप्तिस्वप्नः, तदनन्तरं दुःखमहमस्वाप्समिति परामर्शोपपत्तिः एवं तामसीवृत्तिः सुषुप्तिसुषुप्तिः। तदनन्तरं गाढं मूढोऽहमासमिति परामर्शः।

नन्वस्तु सुषुप्तिनिर्णयः। पञ्चकोशानां स्वरूपं शरीरत्रयादतिरिच्यते न वा? शरीरत्रयाभिमानिवत् पञ्चकोशाभिमानिनोऽपि सन्ति न वा? इति चेच्छृणु। अत्र वक्ष्यमाणस्थूलशरीराणां समष्टिव्यष्टी अन्नमयः कोश इत्युच्यते, *'स वा एषोऽन्नरसमयः पुरुषः'* इति श्रुतेः। तदभिमानिनौ तत्तादात्म्यापन्नौ तप्तायःपिण्डवद्विश्ववैश्वानरौ। एतानि पुनर्वक्ष्य-माणपञ्चीकरणरीत्या चतुर्धा भवन्ति, जरायुजाण्डजस्वेदजोद्भिज्जभेदेन। तत्र सत्त्वप्रधानं देवादिशरीरमयोनिजत्वात्, तेजोमयत्वाद्वा। रजःप्रधानं

मनुष्यशरीरं सुखदुःखादिककर्मजन्यत्वात्। तमःप्रधानं प्रायस्तिर्यगादि-शरीरमत्यन्तजडत्वात्। एवं वक्ष्यमाणलिङ्गशरीराणां समष्टिर्व्यष्टिश्च प्राणमय-मनोमय-विज्ञानमयकोश इत्युच्यते। तदभिमानिनौ पूर्ववद् हिरण्यगर्भ-तैजसौ। तदुक्तं **बृहदारण्यके** – *'त्रयं वा इदं नाम रूपं कर्मेति। अन्नात्मकत्वेनान्नमयकोशः, क्रियाशक्तिमादाय प्राणमयः, नामात्मकत्वेन ज्ञानशक्तिमात्रमादाय मनोमयः, रूपात्मकत्वेन तदुभयाश्रयतया कर्तृत्वमादाय विज्ञानमयकोश'* इति ।

तत्कारणीभूतस्तु मायोपहितचैतन्यप्रतिबिम्बसहिताज्ञानतत्कार्य-संस्काराणां समष्टिर्वक्ष्यमाणेश्वरोपाधिरव्याकृताख्यानन्दमयकोश इत्युच्यते, आनन्दप्रचुरत्वात्। पूर्ववत्तदभिमानिनौ शुद्धसत्त्व-मलिनसत्त्वप्रधानौ ईश्वरप्राज्ञौ। एते च विश्वतैजसादिभेदा एकस्यैव चैतन्यस्यावस्थाभेदेन भवन्ति। तथा च श्रुतिः –

बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥ इति

साक्षी तु अवस्थात्रयोपहितः शरीरत्रयासंसर्गी तुर्याख्यः सर्वव्यवहारस्यानुभवस्वरूप एकविध एवेति, तदुपाधेः अविद्यायाः एकरूपत्वात्।

ननु भवत्त्वेवम्, तथापि प्राज्ञतुरीययोः कथं भेदोऽज्ञानोपाधित्वा-विशेषाद् द्वैताग्रहणाविशेषाच्चेति चेत्, शृणु। यद्यपि शुक्तिरजतादि ज्ञानवदन्यथाग्रहणं स्वप्नः, अद्वितीयात्मतत्त्वास्फूर्तिर्निद्रेत्येतद्द्वयं विश्वतैजसयोः समानमस्ति तथापि अन्यथाग्रहणशून्यत्वे सति बीजनिद्रायुक्तत्वं प्राज्ञत्वम् । तद्भिन्नत्वं तु तुरीयत्वमिति भेदसिद्धिः। तदुक्तं **भगवत्पादै**र्गौडपादभाष्ये-

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः ।
बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ॥
स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ।
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ।
अन्यथा गृह्णतः स्वप्नो निद्रातत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥

इति विवेकः। तस्मादवस्थात्रयाद्यवभासकत्वादयमेवात्मेति सिद्धम्। तदुक्तम् -

जागरस्वप्नसुप्तीनामागमापायिभासनम् ।
यतो भवत्यसौ ह्यात्मा स्वप्रकाश[१७] *चिदात्मकः ॥*

श्रुतिश्च -

यत्र मानानि सिद्ध्यन्ति जाग्रदादित्रयं तथा ।
भावाभावविभागश्च स ब्रह्मास्मीति बोध्यते ॥ इति दिक् ।

नन्वस्तु देह एवात्मा न तु तदतिरिक्तस्तद्भासकः, 'स्थूलोऽहं चेतन' इत्यादिप्रतीत्या भूतचैतन्यवादिभिश्चार्वाकैः स्वीकारात्। स च ध्वंसप्रागभावप्रतियोगी 'जातोऽयं देवदत्तः' 'मृतो देवदत्तः' इत्यादिप्रतीतेरिति चेत्, नैवम् । तस्य ममकारास्पदत्वे नानात्मत्वात् , प्राणवियोगकाले भूतचतुष्टयस्य विद्यमानत्वेऽपि चेतनोऽहमिति व्यवहाराभावात्, ध्वंसप्रागभावस्वीकारे कृतहान्यकृताभ्यागम-प्रसङ्गाच्च। न च देहपातपर्यन्तं पश्यामीत्यादिप्रतीत्या मिलित्वा

१७. स्वव्यवहारे स्वातिरिक्तसंविदनपेक्षत्वं स्वप्रकाशत्वम् ॥

सर्वाणीन्द्रियाण्येवात्मा भवन्त्विति वाच्यम्, । तेषामपि निर्विकल्पकज्ञानमात्रसाधकत्वात्, ममकारास्पदत्वाच्च ॥

नन्वस्तु तर्हि सविकल्पकज्ञानसाधनत्वादन्येन्द्रियप्रवृत्तिमूलसंकल्पादिमत्त्वादन्येन्द्रियाभावेऽपि सत्त्वान् मन एवात्मेति चेत्, मैवम्। गिरिगह्वराद्यवस्थितानां योगिनां वक्ष्यमाणनिर्विकल्पकसमाध्यभ्यासेन संकल्पविकल्पशून्यानां मनसोऽभावात् ममकारास्पदत्वस्य सर्वजनप्रसिद्धत्वाच्च। न च तर्ह्यस्तु प्राण एवात्मा, योगिनां च शरीरे सर्वदा विद्यमानत्वादिति वाच्यम् । तस्याप्यचेतनत्वात् परिच्छिन्नत्वाच्च पूर्ववत् ममकारास्पदत्वाच्चानात्मत्वमिति दिक्।

नन्वस्तु तर्हि प्राणाद्यतिरिक्तं 'यत् सत् तत् क्षणिकम्'इति प्रतीत्या क्षणिकं ज्ञानमेवात्मा, बुद्धमुनिशिष्यैः सौत्रान्तिक - वैभासिक-योगाचार-माध्यमिकादिभिर्बौद्धैः स्वीकृतत्वात्। तच्च विज्ञानं द्विविधम्—आलयविज्ञानं प्रवृत्तिविज्ञानं च। तत्राहमित्याकारमाद्यम् इदमित्याकारकं द्वितीयं, क्षणिकत्वं च द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वम् इति चेत्, न। तस्य कालान्तरभाविभोगार्थं प्रवृत्त्यनुपपत्तेः। तुष्यतुदुर्जनन्यायेन यथाकथञ्चित् प्रवृत्तिसंभवेऽपि भोगासंभवात्, तत्कर्मकर्तुश्चिरातीतत्वात् कृतहान्यकृताभ्यागमप्रसङ्गाच्च ॥ न च क्षणिकानां विज्ञानसन्तानिनां नाशेऽपि तद्धारारूपसन्तानेन भोगः सम्पादनीय इति वाच्यम्। सन्तानं किम् ? सन्तान्यतिरिक्तमपि स्थिरं क्षणिकं वा? आद्ये 'यत् सत् तत् क्षणिकम' इति सिद्धान्तविरोधाद्, द्वितीये तु उक्तदोषापत्तिरिति दिक्।

अथात्मनः क्षणिकत्वासंभवेऽपि अस्तु स्थिरत्वेन सावयवत्त्वं मध्यमपरिमाणवत्त्वं च अर्हतानुयायिभिर्मुक्तकण्ठैः स्वीकृतत्वादिति चेत्, न; मध्यमपरिमाणवत्त्वे घटादिवदनित्यत्वप्रसङ्गात्। तथा च कृतहान्य-

कृताभ्यागमप्रसङ्गः । न च, अस्तु तर्हि नित्योऽणुरिति तदेकदेशिमतानामिति वाच्यम्। अणुत्वस्वीकारे हि सकलदेहव्याप्यत्वाभावेन युगपन्नानावयवावच्छिन्नसुखादिसमवायाभावेन प्रत्यक्षविषयता न स्यात्।

अथ तर्हि अस्तु मध्यमपरिमाणाद्यसम्भवे परममहत्परिमाणवत्त्वेन विभुरेवात्मा। विभुत्वं तु सर्वमूर्तसंयोगित्वम्। मूर्तत्वं च परिच्छिन्नपरिमाणवत्त्वम्। तच्च पृथिव्यप्तेजोवायुमनांस्येव। अमूर्तत्वं त्वाकाशादिचतुष्टये 'स चाहं जानामि घटम्' इति प्रतीत्या ज्ञानादिविशिष्टगुणाश्रय एव, न तु ज्ञानस्वरूपः 'अहं ज्ञानमि'तिप्रतीत्यभावात्, ज्ञानस्य गुणत्वाच्च, ज्ञानभिन्नत्वादेव जडश्च। सा पुनः प्रतिशरीरं भिन्नोऽन्यथा बन्धमोक्षसुखदुःखादिव्यवस्थाऽसिद्धेः। तथा हि तत्त्वदर्शनेन कुत्रापि संसार उपलभ्येत एकस्य सुखसाधने सिद्धे सर्वेऽपि सुखिनः स्युरिति तार्किकवैशेषिक-प्राभाकरादिभिः स्वीकृतत्वादिति चेद्, अत्रोच्यते। नानात्मवादो दुर्निरूपो, युक्तिविरोधात् श्रुतिविरोधाच्च। तथाहि एकस्य पुरुषस्य सुखदुःखादिसामग्र्या उत्पद्यमानं सुखदुःखादि कथं सर्वैर्नानुभूयते, सर्वेषां जीवानां विभुत्वेन सर्वशरीरान्तर्भावाविशेषात्। न च यस्य कार्यकारणसंघातस्तस्यैव सुखादि नान्यस्येति वाच्यम्। तस्यापि सर्वात्मसन्निधौ उत्पद्यमानस्य विशेषहेतोरभावात् कथमेकात्मसंबन्धित्वम्? न च यत्कर्मवशाद् यच्छरीरमुत्पन्नं तत्तस्येति नियम इति शंक्यम्। कर्मणोऽपि देहेन्द्रियव्यापारद्वारा उत्पद्यमानस्य सर्वात्मसन्निधौ सर्वात्मसंबन्धाविशेषात्। न च देहेन्द्रियव्यापारस्य साधारण्येऽपि विजातीयात्ममनः- संबन्धस्यासाधारण्यमिति वाच्यम्, तस्यापि सर्वान् प्रत्यविशेषात्।

अथ स्वकीयमनःसंबन्धो भेदनियामक इति न उच्चैर्वाच्यम्। सर्वदा सर्वात्मसंयुक्तं मनः कस्यचिदेव नान्यस्येति वक्तुमशक्यत्वाद् इति दिक्।

किञ्चात्र न केवलमात्मनानात्वमेव युक्त्यसहम् किन्तु गुणगुणिभावोऽपि। तथाहि ज्ञानात्मनोर्गुणगुणिभावः किं तादात्म्येन समवायेन वा ? नाद्यः, मीमांसकाङ्गीकारेऽपि तव मतेऽनङ्गीकारात् । न द्वितीयः, असंभवात् । तथा हि समवायोऽपि किं संबन्धान्तरेण तत्र संबद्धः उतासंबद्धः? आद्ये, कथं वा नानवस्था, द्वितीये त्वसिद्धिः। न च समवायस्य समवायान्तराऽभावेऽपि स्वरूपसंबन्धेनैव गुणगुणिभाव इति वाच्यम्। स्वरूपसंबन्धोऽपि किं समवायादतिरिक्तस्तत्स्वरूपो वा? आद्ये तत्राप्यनवस्था। द्वितीये स्वं न स्वीयमित्यनुभवेन बाधः, स्वयमेवाश्रयविषयत्वे आत्माश्रयश्च। एवमानन्दादिष्वपि बोध्यम्। श्रुतिविरोधस्यानन्दसाधने पूर्वमेव दर्शितत्वात्, अग्रेऽपि दर्शनीयत्वाच्च। तस्मात् श्रुतिविरुद्धात्मनानात्वस्वीकारेऽपि न सुखदुःखबन्धमोक्षादि-व्यवस्थासिद्धिरिति। विस्तरस्तु **स्वरूपनिर्णये** ॥ एतेन प्रौढमल्लन्यायेन सांख्यपातञ्जलमतमपि प्रत्युक्तम् आत्मनानात्वस्वीकाराविशेषात् । कथञ्चिद् उपपादने च '*सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं*[१८] *ब्रह्म*'त्यादि श्रुत्यनुरोधाल्लाघवाच्च नित्यशुद्ध-बुद्ध-मुक्त-स्वभावात्मैकत्वमङ्गीकर्तव्यम्।

अथाद्वैतवादेऽपि कथं सुखदुःखादिव्यवस्थेति चेत्, शृणु। सुखदुःखाद्याश्रयीभूतान्तःकरणभेदादविद्याभेदाद् वा सर्वव्यवस्था-

---

१८. इदङ्कारास्पदत्वेन गृह्यमाणं स्वातिरिक्तमखिलं जगत् । अग्रे उत्पत्तेः प्राक्। सदेव सत्स्वरूपं ब्रह्मैवासीत्। एकं तार्किकादिस्वीकृतात्मनानात्वरूपसजातीयशून्यत्वम् । अद्वितीयं तार्किकादिस्वीकृतकालपरमाण्वादिविजातीयशून्यत्वम्। एवं सजातीय-विजातीयाभावशून्यमासीदिति कालवासनावासितं शिष्यं प्रत्येव, न तु वास्तवम्, कालस्यापि विजातीयमध्येऽन्तर्भावात् ॥

सिद्धिरिति पूर्वमेव दर्शितत्वात्। तथा च श्रुतिः – *'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्भीर्धीरित्येतत् सर्वं मन एव,'* मृद्घटवत् कार्यकारणयोरभेदाद्; आत्मनस्तु अद्वितीयत्वेन निर्गुणत्वाच्च। अत्रापि श्रुतिः –

'निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम्'।

'एको देवः सर्वभूतेषु गूढः, सर्वव्यापी सर्वभूतान्तरात्मा'॥

एतेनापि ज्ञानाधिकरणत्वमंशांशिभावत्वं मीमांसकस्वीकृतं च निरस्तम् , अतिविस्तरस्तु **स्वरूपनिर्णये**ऽनुसंधेय इति दिक् ॥

*****

इति परमहंसपरिव्राजकाचार्यश्रीब्रह्मानन्दसरस्वतीभगवत्पूज्यपादशिष्य-
सदानन्दविरचिते स्वरूपप्रकाशे इतरदर्शनमतनिराकरण-
पूर्वकशरीरत्रयविवेकात् पृथगात्मतत्त्वप्रकाशनं
नाम प्रथमः परिच्छेदः॥

द्वितीयः परिच्छेदः

॥ त्वं-पदार्थप्रकाशनम् ॥

ननु कथमवस्थातीतस्य स्वयंप्रकाशज्ञानस्वरूपस्यात्मनो 'जानामी'त्यादिप्रतीत्याश्रयत्वमिति चेद्, उच्यते। अन्तःकरणोपाधिवशात्। उप समीपे स्थित्वा स्वीयं रूपमन्यत्रादधातीत्युपाधिः। तथाहि- शरीरमध्ये सर्वशरीरव्यापकं वक्ष्यमाणसूक्ष्मपञ्चभूतारब्धमन्तःकरणद्रव्यं सत्त्वप्राधान्येन स्वच्छं नेत्रादिद्वारा निर्गत्य योग्यान् घटादिविषयान् व्याप्य तत्तदाकारं भवति, द्रुतताम्रादिवत्। तस्य च सौरालोकादिवत् झटित्येव संकोचविकासशालित्वम्। तच्च सामग्रीवशाच्चक्षुरादिद्वारा निर्गत्य देहाभ्यन्तरे मध्ये घटादौ च व्याप्य दण्डायमानं तिष्ठति। तत्र देहावच्छिन्नान्तःकरणभागोऽहंकाराख्यःकर्तेत्युच्यते। तत्प्रतिबिम्बितं तदवच्छिन्नं वा चैतन्यं प्रमातेत्युच्यते। कर्तृत्वं तु क्रियानुकूलेन्द्रिय-संयोगादिव्यापारवत्त्वं, प्रमातृत्वं तु शरीरसंसृष्टभागावच्छिन्नचित्स्वरूपत्वं, देहघटादिमध्यवर्तिदण्डायमानस्तद्भागो वृत्तिज्ञानाख्या क्रियेत्युच्यते। तत्र प्रतिबिम्बितं तदवच्छिन्नं वा चैतन्यं प्रमितिरिति, विषयव्यापकस्तद्भागो विषयस्य ज्ञानकर्मत्वसम्पादकम् अभिव्यक्तियोग्यत्वमित्युच्यते।

प्रमेयं त्वज्ञातविषयगतं ब्रह्मचैतन्यमेव,[1] तदेव ज्ञातं सत्फलम्। फलं नाम भग्नावरणचित्संबन्धः। तत्र चायं प्रकारः-

---

१. आश्रयत्व-विषयत्वभागिनी, निर्विभागचितिरेव केवला। पूर्वसिद्धतमसो हि पश्चिमं, नाश्रयो भवति, नापि गोचरः॥ बहु निगद्य किमत्र वदाम्यहं, शृणुत संग्रहमद्वयशासने। सकलवाङ्मनसाऽतिगता चितिः सकलवाङ्मनसोर्व्यहारभाक्॥

एकस्मिंश्चान्तःकरणपरिणामे जाते घटावच्छिन्नचैतन्यम्, अन्तः-करणावच्छिन्नं प्रमातृचतैन्यं चैकालोकीभावापन्नं भवति। ततो घटावच्छिन्नचैतन्यं प्रमातृभेदात् स्वाज्ञानं नाशयदपरोक्षं भवति। घटं च स्वावच्छेदकं स्वतादात्म्याध्यासाद् भासयति। अन्तःकरणपरिणामश्च वृत्त्याख्योऽतिस्वच्छःस्वावच्छिन्नेनैव चैतन्येन भास्यत इत्यन्तःकरण-तद्वृत्तिघटानामपरोक्षता। तदेतदाकारत्रयम् 'अहं जानामि घट'मिति। अत्र भासकचैतन्यस्यैकरूपत्वेऽपि घटं प्रति वृत्त्यपेक्षत्वात् प्रमातृता। अन्तःकरण-तद्वृत्तिं प्रति तु वृत्त्यनपेक्षत्वात् साक्षितेति संक्षेपः। अपरोक्षत्वं तु अज्ञानविषयताशून्यविषयकत्वम् । विषयता च चिच्चैत्त्यसंबन्धः, न त्वरिक्ता तत्र मानाभावात्। संबन्धस्य च वास्तवत्वासंभवेऽप्याध्यासिकत्वेन व्यवहारः। तदपि द्विविधम्—अर्थापरोक्ष्यज्ञानापरोक्ष्यभेदेन। तत्राद्यं तत्तदर्थस्य स्वव्यवहारानुकूल-चैतन्याभेदः। द्वितीयं तु तत्तद्व्यवहारानुकूलचैतन्यस्य तत्तदर्थाभेदः। न चापरोक्षार्थविषयकत्वं ज्ञानापरोक्षत्वमिति शंक्यम्, स्वरूपसुखापरोक्ष्य-रूपस्वरूपज्ञानेऽव्याप्तिप्रसङ्गात्, स्वव्यवहारे स्वातिरिक्तसंविद्विषयत्व-स्वीकारे स्वप्रकाशलक्षणविरोधाच्च ।अत एव सुखादिप्रकाशरूपे साक्षिणि स्वरूपसुखप्रकाशरूपे चैतन्ये चापरोक्ष्यम्। **परिभाषाकार**मते तु प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदो ज्ञानापरोक्ष्यम्। विषयस्य प्रमा[या]श्च भिन्नत्वं तु विषयापरोक्ष्यम्। प्रमाभेदोऽपि न तावदैक्यम् किन्तु प्रमातृसत्तातिरिक्तसत्ताशून्यत्वमिति। अतिव्याप्त्यादिकं तु तत्रैव चिन्तनीयमिति दिक्।

नन्वेकेन घटादिज्ञानेन एकाज्ञाने नाशिते सद्यो मुक्तिप्रसङ्गः, अज्ञानस्यैकत्वात्। तथा च श्रुतिः *'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं स्वरूपा'* इति। न *'चेन्द्रो मायाभिः पुरुरूप ईयत'* इत्यादि श्रुत्याऽज्ञानस्य नानात्वश्रवणान्न तथात्वप्रसंगः इति वाच्यम् ,

नानाऽज्ञानपक्षेऽपि एकस्य जीवस्यैकाज्ञानोपाधित्वादिति चेन्न। उत्तेजकमणिवद् वृत्त्यावरणाभिभवाङ्गीकारात् ।आवरणं नाम सति भात्यपि वस्तुनि, 'नास्ति' 'न भाति' इति प्रतीतिजननम् । अभिभवोऽप्रतीतिर्न तु नाशः। अतो विद्यमानमप्यविद्यमानसममेव। न चैवं ब्रह्मज्ञानेनापि अविद्याया अनिवृत्तेरनिर्मोक्षप्रसंग इति शंक्यम् , तत्त्वमस्यादिमहा-वाक्यार्थज्ञानस्यैवाबाधितज्ञातार्थविषयकत्वेन प्रामाण्याङ्गीकारात्। प्रत्यक्षादिप्रमाणानां तु बाधितार्थविषयकत्वेन भ्रमत्वेऽपि व्यवहार-सौकर्यार्थं व्यावहारिकप्रामाण्यस्वीकारात् नाज्ञाननिवर्तकत्वम् किन्तु अभिभवमात्रत्वम्। अथवा मूलाज्ञानस्यैवावस्थाज्ञानानि घटादि-विषयावरणानि, तेषां च तार्किकसम्मतज्ञानप्रागभावस्थानीयत्वेन यावन्ति ज्ञानानि तावन्ति अज्ञानानीत्यभ्युपगमात्। तथा चैकेन ज्ञानेनैकस्थपल्लवाज्ञानस्य नाशेऽपि न सद्यो मुक्तिप्रसंगः, मूलाज्ञानस्य विद्यमानत्वात् ॥

ननु नानापल्लवाज्ञानपक्षे एकया वृत्त्या सर्वेषामज्ञानानां नाश उत एकस्य ? आद्ये पुनः शुक्तेः कदापि प्रकाशो न स्यात् , अन्ते वृत्तिकालेऽपि प्रकाशो न स्यात्। एकावरणस्य निवृत्तावपि आवरणान्तरस्यानिवृत्तेरिति चेद्, उच्यते। एकया वृत्त्या एकाज्ञाने नाशितेऽपि तयैवावरणान्तराणां प्रतिरुद्धत्वात् , यावत् सा तिष्ठति तावत् प्रकाशः। तस्यामपगतायां पुनरप्रकाशश्चोपपद्यत इति। इमानि चाज्ञानानि मूलाज्ञानवदनादीनि, इत्येके, जायन्ते इत्यन्ये।

।। २८ परिमलकृद्भिः सिद्धान्तलेशे- व्यावहारिकौ जगज्जीवावावृत्य स्वाप्नौ जगज्जीवौ विक्षिपन्ती निद्रा तावदावरणविक्षेपशक्तियोगाद् अज्ञानावस्थाभेदरूपा। तथा सुषुप्त्यवस्थाप्यन्तःकरणादौ विलीने 'सुखमहमस्वाप्सं न किञ्चिदवेदिष'मिति परामर्शान् मूलाज्ञानवत्

सुषुप्तिकालेऽनुभूयमाना ज्ञानावस्थाभेदरूपैव। तयोश्च जाग्रद्भोग-प्रदकर्मोपरमे सत्त्वे चोद्भवात् सादित्वमिति, तद्वदन्यदप्यज्ञानं सादीति। अथवा मूलाज्ञानवत्पल्लवाज्ञानान्यप्यनादीनीति संक्षेपः।

अत्र च यस्मिन् पक्षे अन्तःकरणतत्संस्कारावच्छिन्नो जीवः, यस्मिंश्च पक्षे सर्वगतोऽसङ्गोऽविद्याप्रतिबिम्बो जीवः तत्रोभयत्रापि प्रमातृचैतन्यो-परागार्था विषयगतब्रह्मचैतन्यावरणभङ्गार्था चान्तःकरणवृत्तिः न चास्मिन् पक्षे अन्तःकरणसम्बद्धस्य धर्मादेरपि[२] भानं सम्भवतीति शक्यम्। अयोग्यधर्माधर्मयोरीश्वरीयमायावृत्तित्वेनेशं प्रति अनावृतत्वेऽपि जीवं प्रत्यावृतत्वाच्च। अन्यथा न्यायमतेऽपि आत्मधर्मत्वात्सुखादिवद् धर्मादिप्रत्यक्षस्य दुर्वारत्वात् । अत्र पक्षद्वयेऽपि ब्रह्मण एव जगदुपादानत्वात् । यस्मिंश्च पक्षेऽविद्यावच्छिन्नः सर्वगतो जीव आवृतः, तस्मिन् पक्षे जीवस्यैव जगदुपादानत्वेनावरणभङ्गार्था वृत्तिः। सुखादौ तु आवरणाभावेन वृत्त्यस्वीकारेऽपि तदवच्छिन्नचित्त एव, ज्ञानत्वादिति विवेकः ।

ननु भवत्वपरोक्षवृत्त्याऽऽवरणनाशोऽभिभवो वा । तथापि परोक्षवृत्त्याऽज्ञानं निवर्तते न वा? आद्ये आप्तवचनाद् दूरस्थवृक्षे परिमाणविशेषावगमेऽपि तद्विपरीतपरिमाणज्ञानं न स्यात्। द्वितीये तु वृत्तिवैयर्थ्यात्। अत्रोक्तं **परिमलकृद्भिः**-द्विविधं विषयावरकमज्ञानम्, एकं विषयाश्रितं रज्ज्वादिनिष्ठसर्पादिविक्षेपोपादानमभानापादकं कार्यकल्प्यम्, अन्यदसत्त्वापादकं पुरुषाश्रितं 'विषयमहं न

---

२. धर्माधर्मादि आत्मनो विशेष गुण एवेति नैयायिकाः । धर्माधर्मादि यागजन्य-क्रियादिरूपत्वादात्मन्येवेति भाट्टाः। ईश्वरप्रसादकोपरूप एवेति वेदान्तिनः । तथा च सर्वेषां मते अतीन्द्रिय एव धर्मादिरिति ।

जानामी'त्यानुभाविकम्। पुरुषाश्रयस्य विषयसंभिन्नविक्षेपोपादानत्वासम्भवेन विषयाश्रितस्य च 'विषयमहं न जानामी'ति साक्षिरूपप्रकाशसंसर्गायोगेन द्विविधस्याप्यावश्यकत्वात् ।

तथा च परोक्षस्थले वृत्तिनिर्गमाभावात्। दूरस्थवृक्षे आप्तवाक्यात् परिमाणविशेषावगमेऽपि तद्विपरीतपरिमाणदर्शनाच्च विषयगताज्ञानानिवृत्तावपि पुरुषगताज्ञाननिवृत्तिरस्त्येव, 'शास्त्रार्थं न जानामी'त्यनुभूताज्ञानस्य तदुपदेशानन्तरं निवृत्त्यनुभवात् । अत एवानुमतेरपि वह्न्यादौ नास्तीति प्रतीतिरनुदयात् , किन्तु कीदृश इति संशयः । तदुक्तम् —

परोक्षज्ञानतो नश्येदसत्त्वावृत्तिहेतुता ।
अपरोक्षधिया नश्येदभानावृत्तिहेतुता ॥ इति

विस्तरस्तु **स्वरूपनिर्णय**, इति दिक् ।

तस्मान्निर्धर्मकस्य स्वप्रकाशज्ञानस्वरूपस्यात्मनोऽन्तःकरणोपाधिवशा'ज्जानामी'त्यादिप्रतीत्याश्रयत्वमिति न किञ्चिद् असमञ्जसम्, इति प्रतिकर्मव्यवस्था।

ननु भवत्वेवं जीवस्य व्यवहारस्तथाप्यवस्थात्रयभासको जीवादतिरिक्तोऽसङ्ग उदासीनोऽयं साक्षी किं ब्रह्मकोटिः, किंवा ईश्वरकोटिः, यदि वा तदुभयभिन्नकोटिः, उत जीवकोटिरिति चेत् मतभेदेन कोटिचतुष्टयमपि प्रमाणमेव। तथा हि **तत्त्वशुद्धि**कृद्भिः यथा 'इदं रजत'मिति भ्रमस्थले वस्तुतः शुक्तिकाद्यन्तर्गतमपीदमंशः प्रतिभासतो रजतकोटिः, तथा ब्रह्मकोटिरेव साक्षी प्रतिभासतो जीवकोटिरिति । जीवस्य सुखदुःखव्यवहारे तस्योपयोगः प्रतिपादितः इति। **तत्त्वप्रदीपिका**कृद्भिरपि मायाशबले सगुणे परमेश्वरे 'केवलो निर्गुण' इति विशेषणानुपपत्तेः, सर्वप्रत्यग्भूतं विशुद्धं ब्रह्मैव जीवाभेदेन

प्रतिपादितः। **कौमुदी**कृद्भिस्तु वार्त्तिकानुसारेण-

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥

इति देवत्वादिश्रुतेः, परमेश्वरस्यैव रूपभेदः कश्चिज्जीवप्रवृत्ति-निवृत्त्योरनुमन्ता स्वयमुदासीनः साक्षी नाम। स च कारणत्वादि-धर्मास्पदत्वादपरोक्षो जीवगतमज्ञानाद्यवभासयंश्च जीवस्यान्तरङ्गं वर्णितः। कूटस्थ[३]चैतन्यं,स्वावच्छेदकस्य[४] देहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षीत्युच्यते। लोकेऽप्यौदासीन्यावबोधाभ्यामेव साक्षित्वं प्रसिद्धम्। यद्यपि जीवस्य वृत्तयः सन्ति देहद्वयभासिकाः तथाप्यन्तरालकाले सहवृत्त्यभावैः कूटस्थचैतन्येनैव भास्यते। अत एवाहङ्कारादीनां सर्वदा प्रकाशसंसर्गात् संशयाद्यगोचरत्वम्। अन्तरालकालीनाहंकारस्य 'एतावन्तं कालमिदमहं पश्यन्नासम्' इत्यनुसन्धानं च । न च कूटस्थप्रकाशिते कथं जीवस्य व्यवहारस्मृत्यादिकमिति वाच्यम्। अन्योन्याध्यासेन जीवैकत्वापत्त्या कूटस्थस्य जीवान्तरङ्गत्वात्। न च, जीवचैतन्यमेव साक्षी भवतु , किं कूटस्थेनेति वाच्यम्। लौकिकवैदिकव्यवहारकर्त्तुस्तस्यौदासीन्य-द्रष्टृत्वासंभवेन 'साक्षी चेता केवलो निर्गुणश्चे'ति श्रुत्युक्तसाक्षित्वायोगात्-

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वादु अत्ति [५]
अनश्नन्नन्योऽभिचाकशीतिङ्
इति

३. कूटवत्तिष्ठतीति कूटस्थः, निर्विकार इति यावत् ।
४. स्वं कूटस्थचैतन्यम्।
५. कर्मफलमित्यर्थः।

कर्मफलभोक्तुर्जीवादुदासीनप्रकाशरूपसाक्षिणः पृथगाम्नातत्वाच्च।

तदुक्तम्—

नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम्।
दीपयेदविशेषेण तदभावेऽपि दीप्यते॥
अहंकारं धियं साक्षी विषयानपि भासयेत्।
अहंकाराद्यभावेऽपि स्वयं भात्येव पूर्ववत्॥
निरन्तरं भासमाने कूटस्थे ज्ञप्तिरूपतः।
तद्भासा भासमानेयं बुद्धिर्नृत्यत्यनेकधा॥
अहंकारः प्रभुः सभ्याः विषया नर्तकी मतिः।
तालादिधारीण्यक्षीणि दीपः साक्ष्यवभासकः॥
स्वस्थानसंस्थितो दीपः सर्वतो भासयेद्यथा।
स्थिरस्थायी तथा साक्षी बहिरन्तः प्रकाशयेत्॥
बहिरन्तर्विभागोऽयं देहापेक्षो न साक्षिणि।
विषया बाह्यदेशस्था देहस्यान्तरहंकृतिः॥

—इति **नाटकदीपे**

अथ च—

यद्यद्रूपादि कल्प्येत बुद्ध्या तत्तत्प्रकाशनम्।
तस्य तस्य भवेत् साक्षी स्वतो वाग्बुद्ध्यगोचरः॥
कथं तादृङ् मया ग्राह्यमिति चेन्मैव गृह्यताम्।
सर्वग्रहोपसंशान्तौ स्वयमेवावशिष्यते॥

एवं जीवाद्विवेचितोऽयं साक्षी न ब्रह्मकोटिः किन्त्वस्पष्टजीवेश्वर-विभागचैतन्यमिति दिक्। जीववादिनस्तु 'अविद्योपाधिक एव साक्षाद्द्रष्टृत्वात् साक्षी, लोकेऽपि ह्यकर्तृत्वे सति द्रष्टृत्वं साक्षित्वं

प्रसिद्धम्। तच्चासङ्गोदासीनप्रकाशरूपे जीव एव सम्भवतीति। जीवस्यान्तःकरणतादात्म्यापत्त्या कर्त्तृत्वभाक्त्वेऽपि स्वयमुदासीनत्वात् 'एको देवः' इति मन्त्रस्तु ब्रह्मणो जीवभावाभिप्रायेण साक्षित्वप्रतिपादकः 'द्वा सुपर्णे'तिमन्त्रस्तु गुहाधिकरणन्यायेन ब्रह्मजीवोभयपरः। गुहाधिकरणभाष्योदाहृत**पैंगिरहस्यब्राह्मण**-व्याख्यातेन प्रकारेण जीवान्तःकरणोभयाभिप्रायेणेति वा न कश्चिद्विरोध' इति वदन्ति । अधिकरणं तु—

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥

तदेकदेशिनस्तु 'भवतु जीव एव साक्षी, किन्तु न सर्वगतेन रूपेण पुरुषान्तरान्तःकरणादीनामपि पुरुषान्तरं प्रति स्वान्तःकरणभासकसाक्षि-संसर्गाविशेषेण प्रत्यक्षत्वापत्तिः। न चान्तःकरणभेदेन प्रमातृ-भेदात्तदनापत्तिः, साक्षिभास्येऽन्तःकरणादौ सर्वत्रसाक्ष्यभेदे सति प्रमातृभेदस्याप्रयोजकत्वात् । तस्मादन्तःकरणोपहितः साक्षी जीव एव। तथा च प्रतिपुरुषं साक्षिभेदात् पुरुषान्तरान्तःकरणादेः पुरुषान्तरसाक्ष्यसंबन्धाद्वा तदयोग्यत्वाद् वा अप्रकाश उपपद्यते। सुषुप्तावपि सूक्ष्मरूपेणान्तःकरणसद्भावात् तदुपहितः साक्षी तदाप्यस्त्येव'।

नन्वन्तःकरणोपहितस्य प्रमातृत्वेन न तस्य साक्षित्वं युक्तम् , सुषुप्तौ च प्रमातृभावेऽपि साक्षिसत्त्वेन तयोर्भेदस्यावश्यवक्तव्यात् । स च न संभवतीति चेद् उच्यते- विशेषणोपाध्योर्भेदस्य सिद्धान्तसम्मतत्वेन अन्तःकरणविशिष्टः प्रमाता, तदुपहितः साक्षीति भेदोपपत्तेः। विशेषणत्वं तु इतरव्यावर्तकत्वे सति विशेष्यान्वयित्वम् यथा 'रक्तं पटं पश्य'।

इतरव्यावर्तकत्वे सति विशेष्यानन्वयित्वमुपाधित्वम् यथा कर्णशष्कुल्यादि श्रोत्रेन्द्रियादिरिति वदन्ति।

ननूक्तरूपस्य साक्षिणश्चैतन्यमात्रावरकेणाज्ञानेनावृतत्वात् कथमावृतेनाविद्याऽहंकारादिभानम् ? तदभावे चैतन्यमात्रावरकमज्ञानमिति सिद्धान्तविरोधः। तदुक्तं **वार्त्तिके** —

यत्प्रसादादविद्यादि स्फुरत्येव दिवानिशम्।
तमप्यपह्नुतेऽविद्या नाज्ञानस्यास्ति दुष्करम् ॥

इति चेत्, सत्यम्। अविद्या राहुवत् स्वावृतप्रकाशप्रकाश्या इति केचित्। अथवा अविद्या अन्तःकरणतद्धर्मावभासकं साक्षिचैतन्यं विहायैवाज्ञानचैतन्यमावृणोतीत्यनुभवानुसारेण कल्पनान्न कश्चिद् दोषः। अत एव सर्वदा तेषामनावृतसाक्षिप्रकाशसंसर्गाद् अज्ञानविपरीतज्ञानसंशयाद्यगोचरत्वम्। ननु साक्षिचैतन्यस्यानावृतत्वे तत्स्वरूपभूतस्यानन्दस्यापि प्रकाशापत्तिरिति चेद् , इष्टापत्तिः, आनन्दरूपप्रकाशप्रयुक्तस्यात्मनि निरुपधिप्रेम्णो दर्शनात् ।

तदुक्तं **वार्त्तिके** —

वित्तात् पुत्रः प्रियः, पुत्रात् पिण्डः, पिण्डात्तथेन्द्रियम् ।
इन्द्रियेभ्यः प्रियः प्राणः, प्राणादात्मा परः प्रियः॥

इति भासत एव, परमप्रेमास्पदत्वलक्षणं सुखमिति विवरणाच्च। विस्तरस्तु **स्वरूपनिर्णय** इति दिक्।

॥ इति साक्षिप्रकरणम् ॥

अथ दृष्टिसृष्टिवादमवलम्ब्य कृत्स्नस्यापि प्रपञ्चस्य नाज्ञातसत्त्वं कल्प्यते मानाभावात्। तथा हि—अज्ञानतत्प्रयुक्तं दृश्यं प्रातीतिकं स्वप्नवत्। यदा यदा विद्यते तदा तदैव साक्षिस्वरूपेण जीवेन प्रकाश्यते, न तु तत्रावरणं तद्भञ्जकमनोवृत्तिर्वा तत्साधनमिन्द्रियं वा कल्प्यते गौरवात्। ननु दृष्टिसृष्टिमते कृत्स्नस्य जाग्रत्प्रपञ्चस्य कल्पितत्वाभ्युपगमे कः कल्पकः, निरुपाधिरात्माऽविद्योपहितो वा? नाद्यः, मोक्षेऽपि साधनान्तरनिरपेक्षस्य सत्त्वेन संसारापत्तिः। न द्वितीयः, अविद्याया अपि कल्पनीयत्वेन तत्कल्पनात् प्राक् कल्पकाभावाद्, इति चेद्, अत्रोच्यते-पूर्वपूर्वकल्पिताविद्योपहितोत्तरोत्तराविद्याकल्पककल्पनाप्रवाहस्य अनिदम्प्रथमत्वाच्च नानवस्था दोषः, अविद्यायाः पूर्वमनादित्व-साधनत्वाच्च। नन्वविद्याया अनादित्वाङ्गीकारे शुक्तिरजतादिवत् कल्पितत्वं न युज्यते । अथात्मनि सामान्यरूपेण सर्वाध्याससम्भवे तु साधनादिविभागानुपपत्तिरिति चेन्न। यथा स्वप्ने कल्प्यमानं गोपुरादिकं किञ्चित्पूर्वसिद्धत्वेन किञ्चित्तदानीमुत्पद्यमानत्वेन कल्प्यते, एवं जागरेऽपि विभागोपपत्तेः। अथवा दृष्टिरेव विश्वसृष्टिः, दृष्टस्य दृष्टिभेदे मानाभावात्। तदुक्तं **विष्णुपुराणे**-

ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः।
अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुबुद्धयः॥

तस्मान्न विज्ञानमृतेऽस्ति किञ्चित्
क्वचित् कदाचिद् द्विज वस्तुजातम्।
विज्ञानमेकं निजकर्मभेदै-
र्विभिन्नचित्तैर्बहुधाभ्युपेतम्॥

यदा समस्तदेहेषु पुमानेको व्यवस्थितः।
तदा हि को भवान् कोऽहमित्येतद्विफलं वचः॥

सितनीलादिभेदेन यथैकं दृश्यते नभः।
भ्रान्तदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक् ॥
इति केचित् ॥

केषाञ्चिन्मते तु वस्तुतोऽनाद्येवाविद्यादिषट्कं तत्र दृष्टिसृष्टिर्नोपेयते किन्तु ततोऽन्यत् प्रपञ्चमात्रे। अविद्यादिषट्कं तु-

जीव ईशो विशुद्धा चिद् विभागश्च तयोर्द्वयोः।
अज्ञानं तच्चितोर्योगः षडस्माकमनादयः॥ इति।

ननु तर्हि श्रुतिस्मृतिसिद्धस्य सृष्टिप्रलयादेः कः कल्पक इति चेदत्र समाहितं **परिमल**कृद्भिः—न कोऽपि कल्पकः। किमालम्बनात्तर्हि '*आत्मन आकाशः सम्भूत*'इति श्रुतिः? निष्प्रपञ्चब्रह्म-आत्मैक्यावलम्बनेनैव इत्यवेहि। अध्यारोपापवादाभ्यां निष्प्रञ्चब्रह्म-प्रतिपत्तिर्भवतीति तत्प्रतिपत्त्युपायतया श्रुतिषु सृष्टिप्रलयोपन्यासः, न तात्पर्येणेति हि भाष्याद्युद्घोषः। किञ्च जगत्सत्यत्ववादिनामपि ईश्वरे जगत्सृष्ट्यादौ प्रवृत्तिरनुपपन्नैव। सा हि लोके सुखे दुःखाभावे तदुभयसाधने वा दृश्यते। ईश्वरस्य च आप्तकामत्वेन तदभावस्य स्वतःसिद्धत्वात्। '*आप्तकामस्य का स्पृहे*'ति श्रुतेः। तदुक्तं **वार्त्तिके** -

अवास्तवात्तु जगतो नाद्वयत्वं विहन्यते।
दृश्यमज्ञानजत्वेन न वस्तु स्वप्नदृश्यवत्॥१॥
नासतो जन्मना योगः सतः सत्त्वान्नवेष्यते।
कूटस्थे विक्रिया नास्ति तस्मादज्ञानतो जनिः॥२॥
वास्तवीं जनिमाहुर्ये तैर्वाच्यं सृष्टिकारणम्।
प्रधानं परमाण्वादिः प्रवर्तकमपेक्षते॥३॥
तत्प्रवर्तक ईशश्चेत् सोऽपि केन प्रवर्तितः।

लीनत्वात्कामकर्मादिर्न प्रवर्तयितुं क्षमम्॥४॥
शक्तिर्नियामिका चेत् सा केनान्येन नियम्यते।
अविचारितरम्यात्तु सृष्टिरात्मनि कल्पिता॥५॥
तथाप्यैक्यात्मबोधाय श्रुत्या सृष्टिरुदीर्यते।
बुद्ध्यारोहाय मन्दानां सृष्टौ दृष्टान्त उच्यते॥६॥
अचेतनो यथा तन्तुरूर्णनाभेः सचेतनात्।
जातं चिदात्मनस्तद्वत् प्राणलोकादचेतनम् ॥७॥
देहादृष्टक्रियाकर्तृरागाध्यासार्थसप्तकात्।
द्वारात् संसारहेतुः स्यादात्मज्ञानं तु लोकवत् ॥८॥
आत्माज्ञानमनर्थानां मूलं लोकेऽपि नेतरत्।
स्वपराक्रममज्ञात्वा युद्ध्यन् म्रियत एव हि॥९॥
एवं स्वात्मानमज्ञात्वा संसारानर्थमाप्नुयात्।
अनर्थाज्ञानयोः कार्यकारणत्वं प्रपञ्च्यते॥१०॥
जिहासितस्यानर्थस्य हेतुः स्यात् सशरीरता ।
न प्रियाप्रियविच्छेदः सशरीरस्य कर्हिचित् ॥११॥
धर्माधर्मौ च देहस्य योनिरित्यागमोऽब्रवीत्।
विहितं प्रतिषिद्धं च कर्ममूलं तयोरपि॥१२॥
कर्तुरेव भवेत् कर्म रागाद् द्वेषाच्च कर्तृता।
शोभनाशोभनाध्यासौ रागद्वेषप्रयोजकौ ॥१३॥
उक्ताध्यासोऽप्यन्यवस्तुसद्भावात् स्याच्च नान्यथा।
वस्त्वन्तरस्य सद्भावः आत्माज्ञानेन कल्पितः॥१४॥
एवं देहादिवस्त्वन्तः सप्तकव्यवधानतः।
संसारानर्थहेतुः स्यादात्माज्ञानं जगत् सृजेद्॥ इति।

तस्मादविचारितरम्यैव सृष्टिरिति। अतएव **बृहदारण्यके** स्वयमेव **भगवत्पादैः**प्रतिबिम्बावच्छेदप्रक्रियां विहाय कौन्तेयस्यैव राधेयत्ववदविक्रियस्य नित्यशुद्धबुद्धमुक्तस्वभावस्याप्यात्मनोऽनाद्यविद्यावशाज्जीवभावो, जीवभावापन्नस्यैव स्वाविद्यावशात् सर्वप्रपञ्चकल्पकत्वेन ईश्वरोऽपि सह सर्वज्ञत्वादिधर्मैः स्वप्नोपलब्धमन्त्रवत् तेनैव स्वभिन्नः कल्प्यते। पश्चाच्च श्रवणादौ प्रवृत्तस्य तत्त्वमस्यादिमहावाक्यार्थबोधात् स्वरूपस्फुरणेन मुक्तिरिति व्याधकुलसंवर्धितराजकुमारदृष्टान्तेन प्रतिपादितम्। तत्रैव **वार्त्तिककृद्भि**रप्युक्तम्-

राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते।
तथैव चात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः॥

तथा चैतादृशज्ञानात् पूर्वं जीवेश्वरभेदो, जीवपरस्परभेदो भासमानोऽपि नाद्वितीयस्वरूपज्ञानानन्तरं स्फुरति, सर्वस्यापि जगतः मिथ्यात्वेन स्फुरणात्, मायागन्धर्वनगरवत् ।

अयमेव एकजीववादाख्यो मुख्यो वेदान्तसिद्धान्तः। इदं चानेकजन्मार्जितसुकृतस्य भगवदर्पणेन भगवदनुग्रहफलाद्वैतश्रद्धाविशिष्टस्य निदिध्यासनसम्पन्नस्यैव चित्तारूढं भवति, न तु वेदान्तश्रवणमात्रेण निदिध्यासनशून्यस्येति रहस्यम् ॥

ननु व्यर्थस्तर्हि तात्पर्याभावे वियत्प्राणादयोर्विसर्गक्रमादि विवृण्वतीनां श्रुतीनां परस्परविरोधपरिहाराय प्रयत्न इति चेन् न, न्यायव्युत्पत्त्यर्थं तात्पर्यमभ्युपेत्य तत्प्रवृत्तेः। उक्तं च **शास्त्रदर्पणकृद्भिः**-

श्रुतीनां सृष्टितात्पर्यं स्वीकृत्येदमिहेरितम्।
ब्रह्मैक्यात्मपरत्वात्तु तासां तन्नैव विद्यते ॥ इति।

विस्तरस्त्वाकरे।

॥ इति दृष्टिसृष्टिवादः ॥

ननु दृष्टिसृष्टिवादे सृष्टिदृष्टिवादे च प्रपञ्चकल्पितत्वेन मिथ्याभूतस्य कथम् अर्थक्रियाकारित्वम् ? न हि शुक्तौ प्रतीतस्य रजतस्य सत्यरजतवद् व्यवहारः सम्भवतीति चेन् न, स्वप्नवदभ्युपगमात्।

अथ स्वाप्नजलादिसाध्यावगाहनादिरूपार्थक्रियाऽसत्या भवतु नाम, कथं जाग्रदनुभूयमानाऽसत्येति चेच्छृणु, स्वसमानसत्ताकार्थक्रिया-कारित्वेन साम्यात्। प्रतिपादितं चैतद् **वार्त्तिके**–

सर्वेन्द्रियवियोगेऽपि सुखिदुःखित्वमात्मनः।
स्वप्ने दृष्टमतः संग आत्मनस्तात्त्विको भवेत्॥
मैवं मृषात्वात् स्वप्नस्य मनोमात्रविजृम्भणात्।
बाह्येन्द्रियवियोगेऽपि न मनो लुप्यते तदा॥२॥
महाराजादयः स्वस्य स्वप्नानुभवगोचराः।
न वास्तवा इति ज्ञेया शयानेभ्यः पृथक्त्वतः॥३॥
गृहे शयाना ये दृष्टास्ते तु स्वप्ने वनं गताः।
जाग्रद्दृष्टं मृषा स्वप्ने स्वप्नस्थं जागरे मृषा॥४॥
अन्योन्यव्यभिचारित्वात् स्वप्नजाग्रदवस्थयोः।
मिथ्यात्वमित्यसावर्थः स्वप्नश्रुत्या[६] विवक्षितः॥५॥ इति।

युक्त्यन्तरं च–

यथा घटादिप्रकाशनक्षमतत्तत्पुरुषान्तरनिरीक्ष्यमाणालोकवति कक्षे, सद्यः प्रविष्टेनैन्द्रिजालिकापवरकेण, कल्पितस्य संतमसस्य प्रसिद्धसंतमसोचितार्थक्रियाकारित्वं दृष्टम्, तेन तं प्रति घटाद्यावरणं, दीपाद्यानयनेन तदपसारणं, तन्नयने पुनरावरणमित्यादेरनुभवसिद्धत्वात्,

---

६. न यत्र रथाः, न रथयोगाः, न पन्थानो भवन्ति, अथ तत्र रथान् पथः सृजति।
(बृ०आ०४/३/१०)

किञ्च स्वप्नाङ्गनाभुजङ्गादिजनितस्य सुखभयादेर्जागरणेऽप्यनुवृत्तिदर्शनाच्च। अन्यथाऽनुकूलप्रतिकूलस्वप्नयो रागद्वेषौ न स्तः।

ननु शुक्त्यादौ रजतमित्यादि भ्रमस्थले देशान्तरानुभूतरजतस्यैव दुष्टेन्द्रियजन्यसन्निकर्षेण ज्ञानलक्षणया भानोपपत्तावनिर्वचनीयरजतोत्पत्तिकल्पने गौरवम्, तथा चान्यथाख्यातिसंभवेन दृष्टान्तासिद्ध्याऽनुमानस्यासम्भव, इति चेत्,मैवम्। अनिर्वचनीयख्यात्यनभ्युपगमे सामानाधिकरण्येन बाधाकारासम्भवेन सर्वेषां वादिनां भ्रमबाधयोर्वैयधिकरण्यापत्तेः। तथाहि— दोषसहकृतेनेन्द्रियेण विप्रकृष्टस्यैव रजतस्य ज्ञानलक्षणया पुरोऽवस्थितत्वेन ग्रहणानन्तरं बाधे सति, तत्र रजतमिति न त्वत्रेति तदाकारः स्यात्। अख्यातिवादे तु असंसर्गाग्रहादनुभवस्मरणात्मकस्याज्ञानद्वयस्येदं रजतमिति भेदग्रहः।

असंसर्गग्रहे च ग्रहणस्मरणयोर्विवेकेन तद्रजतमिति बाधाकारः स्यात्। आत्मख्यातौ चान्तरे विज्ञानाकारे रजते बहिष्ट्वमध्यस्यत इति तद्बाधे सत्यप्यान्तरं रजतं न बहिरिति तदाकारः स्यात्। असत्ख्यातौ तु भ्रमकालेऽपि भानासंभवः। असतः प्रमाणागोचरत्वात्। तस्मान्न दृष्टान्तासिद्ध्याऽनुमानासंभव इति दिक्।

पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्न पक्षैकदेशे दृष्टान्ते सिद्धसाधनं दोषः, तार्किकादिभिरपि स्वीकृतत्वात्। ब्रह्मणि बाधवारणाय ब्रह्मान्यदित्येव पक्षः। दृश्यत्वञ्च चिद्विषयत्वं स्वव्यवहारस्वातिरिक्तसंविदपेक्षत्वं वा, मिथ्यात्वञ्च सद्भिन्नत्वे सत्यसद्भिन्नत्वम्। सत्त्वञ्च कालत्रयाबाध्यत्वम्, असत्त्वञ्च कालत्रयेऽपि प्रतीत्यनर्हत्वं,सत्त्वेन स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं वा मिथ्यात्वं, ज्ञाननिवर्त्यत्वं वा अनिर्वाच्यत्वं वा।

ननु किमिदमनिर्वाच्यत्वम्? किं निरुक्तिविरहः, स्वनिमित्तज्ञान-विरहो वा, तन्निमित्तार्थविरहो वा? नाद्यः, अनिर्वाच्य इत्यनेनैव निरुक्त्या व्याघातात्, न द्वितीयः, निरुक्तिरूपफलसत्त्वेन तन्निमित्तविरहस्य वक्तुमशक्यत्वात्। अत एव न तृतीयः, अर्थस्यापि वक्तुं शक्यत्वेन तन्निमित्तार्थविरहाभावाच्च। नापि सद्विलक्षणत्वे सति असद्विलक्षणत्वं सदसद्रूपत्वेनाप्युपपत्तेः। मैवम्। सद्विलक्षणत्वे सति, असद्विलक्षणत्वे च सति, सदसद्विलक्षणत्वम् अनिर्वाच्यत्वम्। सत्त्वासत्त्वाभ्यां विचारासहत्वे सति सदसत्त्वेनापि विचारासहत्वं वा। एतेन 'अनिर्वाच्य इत्यनेनैव निरुक्त्या व्याघात' इत्याद्यपास्तम्। अलीकवादिनं प्रति अलीकभिन्नत्वमपि पक्षे विशेषणं देयमिति। अलीकत्वं सर्वदेशकालनिष्ठात्यन्ताभावप्रतियोगित्वे सति सत्तादात्म्य-शून्यत्वम्।

नन्वेतादृशे ब्रह्मणि किञ्चित् प्रमाणमस्ति न वा? आद्ये स्वप्रकाशहानिः, प्रमाणविषयत्वेन घटादिवद् दृश्यत्वेन मिथ्यात्वापत्तेश्च। द्वितीये अलीकत्वापत्तिः शास्त्रारम्भवैयर्थ्यापत्तिश्च। तथा च जितं शून्यवादिनेति चेत्, नैवं शङ्कनीयम्। निर्विकल्पस्वप्रकाशज्ञानस्वरूपस्य ब्रह्मणः सर्वप्रमाणप्रकाशकत्वेन तदपेक्षाया असम्भवात्। न हि दीपस्य दीपान्तरापेक्षास्ति। न हि बाह्यानां सूर्यादीनामाभ्यन्तराणां बुद्ध्यादि-करणानाञ्चाचेतनत्वेन आत्मप्रकाशं विना प्रकाशः सम्भवतीत्यनु-भवविरोधात्। तस्य स्वप्रकाशत्वानभ्युपगमे च जगदान्ध्यप्रसङ्गात्, परमप्रेमास्पदत्वेन सुखस्वरूपत्वस्य पूर्वं साधितत्वाच्च। तथा च **श्रुतयः**–

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥

निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम्।
अप्रमेयमनादिञ्च यज्ज्ञात्वा मुच्यते बुधः॥

एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम् । इत्याद्याः।

'अप्रमेयम्' एतेनाद्यकार्यं सकर्तृकं कार्यत्वाद्, घटवद्, इति तार्किकाद्यनुमानगम्यत्वमपि निरस्तम्। तथा चैतादृशस्य आत्मनोऽलीकत्वापादनमेवालीकम् ॥

किञ्च प्रमाणाभावे ब्रह्मणः स्वरूपानुपपत्तिर्वा उत प्रतीत्यनुपपत्तिः? नान्त्यः, तस्य स्वप्रकाशपरमानन्दरूपत्वेनेतरापेक्षाऽनङ्गीकारात्, प्रमाणस्य स्वप्रमेयोत्पादकत्वानङ्गीकारच्च। न प्रथमः। किञ्च प्रमाणेऽपि प्रमाणमस्ति न वा? आद्ये अनवस्था प्रसङ्गः, द्वितीये खरशृङ्गवदसत्त्वेन स्वप्रमेयसाधनासम्भवात्। तथा च प्रमाणेन वस्तुसिद्धिरित्यभिमानमात्रम्। न च तर्हि सुतरां शास्त्रारम्भवैयर्थ्यमिति वाच्यम्, आत्मनः स्वप्रकाशत्वेन शास्त्रारम्भानपेक्षत्वेऽपि कल्पिताज्ञानतत्कार्यविरोधिकल्पितवृत्तिविशेषार्थं शास्त्रारम्भस्यावश्यकत्वात्। तस्य चाग्रे वक्ष्यमाणत्वात् कल्पितस्यैव कल्पितविरोधात्, 'यक्षानुरूपो बलिरिति' न्यायात्। तथा च *'एकमेवाद्वितीयम्'* *'सत्यं ज्ञानमनन्तं ब्रह्म'* इत्यादि शास्त्रमेव स्वप्रमेयानुरोधेन स्वस्यापि कल्पितत्वमापादयति, अन्यथा स्वप्रामाण्यानुपपत्तेः। एतेन शब्दगम्यस्य ब्रह्मणः सत्यत्वे शब्दयोग्यतायाः शाब्दधीप्रामाण्यस्य च अद्वैतागमं प्रति, प्रत्यक्षस्योपजीव्यत्वांशे च सत्यत्वमवश्यमभ्युपेयम्। तदुक्तं **खण्डनटीकायाम्** —

बाधव्याधभयोद्विग्ना तवाद्वैतश्रुतिर्मृगी।
ब्रह्मारण्येऽपि विश्वासं कथमासादयिष्यति॥

इत्यादि निरस्तम् । शब्दार्थयोग्यतादीनां समानसत्ताकत्वनियमस्य निष्प्रमाणत्वात् घटज्ञानप्रामाण्यस्य अघटत्ववत् सभूतब्रह्मज्ञान-प्रामाण्यादीनामपि तदतिरिक्तघटितत्वेन मिथ्यात्वोपपत्तेरिति संक्षेपः। किञ्च **भगवत्पादै**रात्मनः स्वप्रकाशत्वं युक्तितोऽपि प्रतिपादितम्। तथा हि- यत्राजिज्ञासोः संशय-विपर्यय-व्यतिरेकप्रमाणानामन्यतममपि नास्ति तत्र तद्विरोधिज्ञानमिति सर्वत्र दृष्टम् अन्यथा त्रितयान्यतमापत्तेः। आत्मनि च 'अहं न वे'ति न कस्यचित् संशयः। नापि 'नाहमि'ति विपर्ययः, विपर्ययप्रमा वेति। तथा च तत्स्वरूपप्रमा सर्वदास्तीति वक्तव्यम्। तस्य सर्वसंशयविपर्ययधर्मित्वात्। धर्मपक्षे सर्वमभ्रान्तं, प्रकारे तु विपर्यय इति न्यायात्। तदुक्तम्—

प्रमाणमप्रमाणं च प्रमाभासस्तथैव च ।
कुर्वन्त्येव प्रमां यत्र तदसम्भावना कुतः॥ इति

कृतमधिकेनेति शिवम्।

*****

॥ इति श्रीमत्परमहंसपरिव्राजकार्यश्रीब्रह्मानन्दसरस्वतीभगवत्पूज्यपाद-
शिष्यश्रीसदानन्दविरचिते स्वरूपप्रकाशे सपरिवार-
'त्वंपदार्थप्रकाशनं' नाम द्वितीयः परिच्छेदः॥

तृतीयः परिच्छेदः

॥ तत्-पदार्थप्रकाशनम् ॥

परिच्छेदद्वयेनात्र 'त्वम्'-पदार्थप्रकाशनं कृतम्। संक्षिप्य चैवास्मिन् 'तत्'-पदार्थः प्रकाश्यते।

ननु शरीराद्यतिरिक्तनित्यशुद्धबुद्धमुक्त'त्वम्'पदार्थप्रकाशनेनैवाज्ञान-तत्कार्यनिवृत्तिः सम्भवति, किं'तत्' - पदार्थ निर्णयप्रयासेनेति चेत्, नैवम्। तत्पदार्थप्रकाशनं विना वक्ष्यमाणतत्त्वमस्यादिमहावाक्यार्थासम्भवात्। न हि पदार्थज्ञानं विना वाक्यार्थज्ञानं सम्भवति। न वा तदभावेऽज्ञान-तत्कार्यनिवृत्तिर्ब्रह्मणि परोक्षज्ञानस्य विद्यमानत्वात्। तथा च वाक्यार्थप्रकाशार्थं तत्पदार्थः संक्षेपेण प्रकाश्यते। तत्र स्वमते पदार्थो द्विविधः दृक्-दृश्यञ्च। अन्वयादिपरिकल्पितानां पदार्थानामत्रैवान्तर्भावात्। अन्वयादिपरिकल्पितास्तु नामरूपकर्मात्मकं पदार्थत्रयमेवेति वेदान्तैक-देशिनः। द्रव्यगुणकर्मसामान्यात्मकपदार्थचतुष्टयमेवेति कर्ममीमांसक-वार्त्तिककारीयाः। कार्यकारणयोगविधिदुःखान्ता पञ्चैवेति पाशुपताः। द्रव्यादयः षडिति वैशेषिकाः। जीवाजीवास्रवसंस्रवनिर्जरबन्धमोक्षाः सप्तेति क्षपणकाः। द्रव्यगुणकर्मसामान्यविशेषशक्तिसमवायनियोगा इति प्राभाकराः। प्रमाणादयः षोडशेति तार्किकाः। मूलप्रकृतिप्रभृतयश्चतुर्विंशति, पुरुषेण साकं पञ्चविंशति चेति सांख्याः। त्रिंशदिति पौराणिकाः, षट्त्रिंशत्तत्त्वमिति शैवागमाः इति पदार्थविवरणे निरूपिताः।

तत्र दृक्पदार्थ आत्मा नित्यशुद्धबुद्धमुक्तस्वभावः पारमार्थिक एक एव सर्वदा एकरूपोऽपि औपाधिकभेदेन त्रिधा विभज्यते — ईश्वरो,

जीव:,साक्षी चेति। उप समीपे स्थित्वा स्वीयं रूपमन्यत्रादधातीत्युपाधिः। तथा च कारणोपाधिरूपा मायाऽपि सच्चिदानन्दरूपे आत्मनि समीपे स्थित्वा स्वव्यवहारमघटमानघटनारूपं तत्र समर्पयीति भवत्युपाधिः। तत्र कारणोपाधिभूतविचित्रानन्तशक्त्यघटमानघटनापटीयसीमायोपहितं चैतन्यमीश्वरः कर्ता। तदुक्तम् —

निरुपमनिर्गुणेऽप्यखण्डे
मयि चिति सर्वविकल्पनातिशून्ये।
घटयति जगदीयजीवभेदा-
नघटनघटना पटीयसी माया ॥इति॥

श्रुतयश्च –

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।
न तस्य कार्यं करणं च विद्यते...।
पराऽस्य शक्तिर्विविधैव श्रूयते...।

जवनः पादकार्यकारी, ग्रहीता हस्तकार्यकारी, कार्यं शरीरम् करणमिन्द्रियमित्यर्थः। आकाशशरीरं ब्रह्म, 'आकाशस्तल्लिङ्गाद्' इति न्यायाच्च। आकाशोऽत्राव्याकृतम्। उक्तं च भगवत्पूज्यपादैः – *'स भगवान् ज्ञानैश्वर्यबलवीर्यतेजोभिः सदा सम्पन्न'* इति। सदा यावत्कालस्थायि, स्वमते कालस्यापि कल्पितत्वस्वीकारात्। कर्तृत्वञ्च न्यायमतवदखिलकार्यानुकूलोपादानगोचरज्ञानचिकीर्षाकृतिमत्त्वम्, तच्च श्रुतिसिद्धम्। तथा हि—

यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः।
तस्मादेतद् ब्रह्म नामरूपमन्नञ्चाजायत ॥

तदैतत् सोऽकामयत बहु स्यां प्रजायेय, तन्मनोऽकुरुत.......।

इत्यादीनि केचित्। अन्ये तु चिकीर्षाकृतिनिर्वाहाय चिकीर्षाकृत्यन्तरापेक्षायामनवस्थाप्रसङ्गात् कार्यानुकूलज्ञानत्वमेव कर्तृत्वम्। न च ज्ञानेऽप्यनवस्था दुर्वारेति वाच्यम्, तस्य स्वरूपत्वात्। वस्तुतस्तु अनिर्वचनीयकार्योत्पत्तौ ईश्वरकर्तृत्वस्यापि अघटनघटनापटीयसी मायोपहितत्वेनैतत्तर्क्यत्वं शरणीकरणीयम्। न ह्यतर्क्यं भगवदैश्वर्यं ब्रह्मादिभिरपि तर्कितुं शक्यते, वक्ष्यमाणतदुपाधिगुणावतारत्वात्। तदुक्तं **पुष्पदन्तेन**-

अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगताम्। इति

ननु मायाशक्तिः किमधिष्ठानरूपा उत कार्यरूपा आहोस्वित् तदुभयभिन्ना? आद्ये दृष्टान्ताभावः, न हि दाहकशक्तिर्दहनरूपा सम्भवति, प्रतिबन्धके सति दाहादर्शनात्। द्वितीये कार्यस्योत्पत्तेः पूर्वमभावात्। तृतीये त्वद्वैतहानिः। किञ्च तत्रापि प्रमाणमस्ति न वा? नाद्यः, अतीन्द्रियायास्तस्याः प्रत्यक्षप्रमाणविषयत्वात् सर्वसम्मतेन्द्रियगणवद् अनुमानादेरप्यनिर्वाच्यत्वेनैवासम्भवात्। अन्त्येऽलीकत्वापत्तिरिति चेद्, उच्यते।

यथा कार्यरूपात् स्फोटात् कारणरूपादग्नेश्च दाहकशक्तिर्यथा वा पृथुबुध्नोदराकाराद् घटकार्यात् कारणरूपायाश्च मृदः घटशक्तिरतिरिक्ताऽनिर्वाच्या कल्प्यते तथा मायाशक्तिरपि कार्यान्यथाऽनुपपत्तिगम्या सदसद्भ्यामनिर्वाच्याऽतिरिक्तैवेति न पूर्वोक्तदोषावकाशः, श्रुतिरूपप्रमाणराजस्य पूर्वं *'मायां तु प्रकृति'*मित्यादेर्दर्शितत्वाच्च। तदुक्तम् —

कार्यादाश्रयतश्चैषा भवेच्छक्तिर्विलक्षणा।
स्फोटाङ्गारौ दृश्यमानौ शक्तिस्तत्रानुमीयते॥

पृथुबुध्नोदराकारो घटः कार्योऽथ मृत्तिका।
शब्दादिभिः पञ्चगुणैर्युक्ता शक्तिस्त्वतो द्विधा ॥
न नृपादिर्न शब्दादिः शक्तावस्ति यथा तथा।
अत एव ह्यचिन्त्यैषा न निर्वचनमर्हति ॥

विशेषतस्तु द्वितीये परिच्छेदे वार्त्तिकवचनैः प्रतिपादितत्वाच्चेति दिक्।

स एवंभूतकारणोपाधियुगनन्तबलवीर्यादिसंपन्न ईश्वरोऽपि त्रिविधः, स्वोपाधिभूतमायागुणत्रयभेदेन ब्रह्म-विष्णु-रुद्रभेदात्। तत्र कारणीभूतरज-उपहितो ब्रह्मा स्रष्टा, हिरण्यगर्भस्तु सूक्ष्मपञ्चमहाभूत-कारणाभावान्न ब्रह्मा, तथापि स्थूलभूतोत्पादकत्वात् क्वचिद् ब्रह्मेत्युपचर्यते। तदुक्तम्- 'हिरण्यगर्भो नाम मूर्तित्रयादन्यः प्रथमो जीवः। सैव शरीरी प्रथमः। स एव पुरुष उच्यते'। *'आदिकर्ता च भूतानां ब्रह्माग्रे समवर्तत', 'हिरण्यगर्भः समवर्तताग्रे'* इत्यादि श्रुतेश्च। कारणीभूतसत्त्वगुणावच्छिन्न उपहितो वा विष्णुः पालयिता, कारणीभूततम-उपहितो रुद्रः संहर्ता। एवमेकस्यैव चतुर्मुखचतुर्भुज-पञ्चमुखाद्याः पुमाकाराः, श्रीर्भारतीभवान्याद्याः स्त्र्याकारा, अन्ये च मत्स्यकूर्मादयो लीलयैवाविर्भवन्ति। वस्तुतस्तु न [तत्]स्त्री न पुमान् न षण्ढः। तथा च **श्वेताश्वतरोपनिषदि**—

नैव स्त्री न पुमानेष नैव चायं नपुंसकः।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते॥

तदुक्तं गजेन्द्रेण —

स वै न देवासुरमर्त्यतिर्यङ्
न स्त्री न षण्ढो न पुमान्न जन्तुः।
नायं गुणः कर्म न सन्नवाऽसन्
निषेधशेषो जयतादशेषः॥

न च गुणावतारेषु प्रमाणाभावः, श्रुतिस्मृतिपुराणादिष्वति-प्रसिद्धत्वात्। तथा च श्रुतिः —

अथ यो ह खलु वा चास्य तामसोंऽशोऽसौ
ब्रह्मचारिणोऽयं रुद्रः। अथ यो ह खलु वा चास्य
राजसोंऽशोऽसौ ब्रह्मचारिणो योऽयं ब्रह्मा।
अथ यो ह खलु वा चास्य सात्त्विकोंऽशोऽसौ
ब्रह्मचारिणो योऽयं विष्णुः।

अत्र **दीपिकाव्याख्या** – तामसो तमःप्रधानोंऽशस्तम-उपाधिको विशेषः। एवं भवान्यादीनां नामान्यप्याश्व**लायन**शाखायामाम्नात-मनुसन्धेयम्।

विष्णुपुराणे प्रकृतिं प्रकृत्य—

अण्डानां तु सहस्राणां सहस्राण्ययुतानि च।
ईदृशानां तथा तत्र कोटिकोटिशतानि च॥

सौरे -

ब्रह्माण्डमेतत् सकलं ब्रह्मणः क्षेत्रमुच्यते।
सहस्रकोटयः सन्ति ब्रह्माण्डास्तिर्यगूर्ध्वगाः॥
ब्रह्माणो हरयो रुद्रास्तत्र तत्र व्यवस्थिताः।
आज्ञया देवदेवस्य महादेवस्य शूलिनः॥
ब्रह्माण्डानामसंख्यानां ब्रह्मविष्णुहरात्मनाम्।
उद्भवे प्रलये हेतुर्महादेव इति श्रुतिः॥

भविष्ये च -

विष्णोरन्यं तु पश्यन्ति ये मां ब्रह्माणमेव च।
कुतर्कमतयो मूढाः पच्यन्ते नरकेष्वघाः॥

उक्तं च **पद्मपुराणे** -

यं वेदान्तविदो वदन्ति मुनयो यो योगिभिर्गम्यते।
स ब्रह्मा यदि वा हरो यदि हरिर्योऽसौ च तस्मै नमः॥

बृहन्नारदीये-

हरिरूपी महादेवो लिङ्गरूपी जनार्दनः।
ईषदप्यन्तरं नास्ति भेदकृन्नरकं व्रजेत् ॥
एक एव त्रिधाभिन्न एकोऽप्येकादशाकृतिः।
एक एवाहतैश्वर्य एक एव जगन्मयः॥

स्कन्दपुराणवचनाच्च **विष्णुपुराणे** -

भवानहं च विश्वात्मन् एक एव हि कारणम्।
जगतोऽस्य जगत्यर्थे भेदेनावां व्यवस्थितौ॥
त्वया यदभयं दत्तं दत्तं तदभयं मया।
मत्तो न भिन्नमात्मानं द्रष्टुमर्हसि शङ्कर ॥
योऽहं सत्त्वं जगच्चेदं सदेवासुरमानुषम्।
अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः॥

नारदीये च -

सृष्टिस्थित्यन्तकरणे ब्रह्मविष्णुमहेश्वराः।
यस्यायुताऽयुतांशांशास्तद् ब्रह्मेत्यभिधीयते॥

एवमन्यत्रापि बोद्धव्यम् इति॥

एवमत्र प्रकृत्या जीवेश्वरजगद्विभागशून्ये नित्यशुद्धबुद्धमुक्तस्वभावे आत्मन्यध्यस्ताऽनादिमाया सत्त्वप्राधान्येन स्वच्छादर्श इव मुखाभासं चिदाभासमागृह्णाति। ततश्च बिम्बस्थानीयः परमेश्वरः उपाधिदोषानास्कन्दितः, प्रतिबिम्बस्थानीयश्च जीवः उपाधिदोषास्कन्दितः। ईश्वराच्च

जीवभोगाय वक्ष्यमाणाकाशादिक्रमेण शरीरेन्द्रियसंघातस्तद्भोग्यश्च कृत्स्नः प्रपञ्चो जायते। बिम्बप्रतिबिम्बमुखानुगतमुखवच्च ईशजीवानुगतं मायोपाधिरहितं चैतन्यं साक्षीति कल्प्यते, अत एव मानमेयादिप्रक्रियां विनैव स्वाध्यस्तमायातत्कार्यं च कृत्स्नं तेन प्रकाश्यते। यद्यपि मायाप्रतिबिम्ब एक एव, तथाप्यविद्यागतानामन्तःकरणसंस्काराणां भिन्नत्वात् तद्भेदेन अन्तःकरणोपाधेस्तस्याश्च भेदव्यपदेशाज्जीवभेदव्यपदेशः। अविद्याभेदादिव वा भेदः। ते च जीवा बिम्बभूतेश्वरैक्यसाक्षात्कारं विना मायां निवर्तयितुं असमर्था एव अखिलानर्थरूपं संसारं संसरन्ति। साक्षात्कारश्च वक्ष्यमाणमहावाक्यजन्यया निर्विकल्पकनिर्वचनानर्ह-शुद्धचिदाकारत्वधर्मविशिष्टयाऽनेकजन्मार्जितसुकृतफलभूतया निदिध्यासनपरिपाकप्रसूतया सर्वाज्ञानतत्कार्यविरोधिन्या चेतोवृत्त्या भवति। तथा च **श्रुतयः**-

तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।

आत्मेत्येवोपासीत। तमात्मानमेवावेत।

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।

दैवी ह्येषा गुणमयी मम माया दुरत्यया।

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥

इति भगवद्वचनाच्च।

एतेन— "ननु न ब्रह्मणा सह जीवस्यैक्यं सम्भवति, ब्रह्मण एव सद्भावाभावात्। तथा हि 'नास्ति सर्वज्ञत्वादिविशिष्टं ब्रह्म, आम्नायस्य क्रियापरत्वेन तत्र तात्पर्याभावादि'ति कर्ममीमांसकाः। 'प्रधानमचेतनमेव जगत्कारणमि'ति सांख्याः। 'अस्ति नित्यज्ञानादिमान् पृथिव्यादिकार्य-लिङ्गानुमितः स च जीवाद् भिन्न एवे'ति तार्किकवैशेषिकाः। 'पशुपतिरेव जगत्कारणं सचेतनोऽपि जीवाद् भिन्नस्तदुपास्य एवे'ति पाशुपताः।

'भगवान् वासुदेव एव जगत्कारणं तस्मादुत्पद्यते संकर्षणाख्यो जीवस्तस्मान्मनःप्रद्युम्नस्ततोऽहङ्कारोऽनिरुद्धः, तेन कार्यत्वाज्जीवस्य तेन सह नात्यन्ताभेद' इति पाञ्चरात्रिकाः। 'क्षणिकं विज्ञानं सर्वज्ञ'मिति सौगताः।'परिणामी नित्यसर्वज्ञो भिन्नाभिन्न' इति जैनास्त्रिदण्डिनश्च।'क्लेश-कर्मविपाकाशया[1]दिरहितः ज्ञानस्वरूपः प्रधानांशसत्त्वगुणप्रतिफलिततया सर्वज्ञ' इति पातञ्जलाः'— इत्यपास्तम्, प्रथमपरिच्छेदेऽप्यात्मभेदस्य निराकृतत्वात्। विस्तरस्तु **स्वरूपनिर्णये**ऽनुसन्धेयः॥

सा पुनश्चेतोवृत्तिरनन्तशक्तिमायानियन्तुरनेककोटिब्रह्माण्डनायकानां ब्रह्मविष्ण्वादीनामपि नायकस्यैव परमया भक्त्या भवति । ननु केयं भक्तिः कश्च पुनर्भक्त इति चेच्छृणु – तत्र भक्तिर्नाम भजनम्, भज् सेवायाम् इति स्मरणात्। तच्च कायेन मनसा वाचा वा निष्पाद्यो भजनीयस्य कस्यचित्तुष्टौ हेतुर्व्यापारो भजमानपुरुषनिष्ठः, विशेषलक्षणं तु सर्वोत्तमत्वज्ञानपूर्वकाराध्यत्वेन प्रेमप्रवाहो भक्तिः, आराध्यत्वेन ज्ञानमात्रं वा। तच्च नवविधम् श्रवणकीर्तनादिभेदेन। तदुक्तं प्रह्लादेन हिरण्यकशिपुं प्रति [**श्रीमद्भागवते**] –

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥

---

१. अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः। अनित्याशुचिदुःखानात्मसु नित्यशुचि-सुखात्मख्यातिरविद्या । बुद्धिपुरुषयोरभेदाभिमानोऽस्मिता । सुखानुभवो रागः। दुःखानुशयी द्वेषः। मरणत्रासोऽभिनिवेशः। अविद्याक्षेत्रम् उत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्। कर्म त्रिविधं शुक्लकृष्णमिश्रभेदेन । विपाकः कर्मणां फलानि। आशयाः वासनाः ॥

भगवति सर्वात्मकत्वेन पुत्रभार्यादिरूपेण स्वरूपेण च परमप्रेमास्पदे आत्मनि च सर्वेषां जीवानां सदा भूयासमिति प्रेमदर्शनात्। अर्पिता शास्त्रज्ञानात् पूर्वमपि विद्यमाना भक्तिर्यदि शास्त्रेणाधीतेन अद्धा साक्षादेव नवलक्षणा क्रियते, तदधीतम् उत्तमं मन्य इत्यर्थः। तच्छब्दस्योत्तर-वाक्यत्वाद् यच्छब्दापेक्षा, श्रवणादिस्वरूपज्ञानस्य श्रोतव्यकीर्तनीयादि-गुणग्रामज्ञानस्य श्रवणादिकर्त्तव्यताज्ञानस्य च शास्त्राधीनत्वात्।

ननु किं श्रवणादेः स्वरूपमिति चेद् उच्यते। सगुणनिर्गुण-भगवत्प्रतिपादकस्य वाक्यस्य श्रवणेन ग्रहणं *श्रवणम्,* तच्च श्रवणस्य प्रीतिकरम्। साधारणोऽपि जनस्तादृशेन स्वीयश्रवणेन प्रीणाति। तादृशज्ञानरूपस्य श्रवणस्य कीर्तनहेतुत्वात्तदुत्तरम्। तदाह — *कीर्तनं* सगुणस्य निर्गुणस्य वा वाचकस्य शब्दस्य स्वमुखेनोच्चारणम्। तत्राद्यस्य प्रीतिकरत्वं स्पष्टम् । द्वितीयस्यापि प्रणवाद्युच्चारणस्य प्रीतिकरत्वेन भाष्यादावुक्तत्वाद् 'अशक्नुवन् भावयितुं वाक्यमेव समभ्यसे'दित्याचार्योक्तेश्च। तदुत्तरम् श्रवणकीर्तनाभ्यामनुभूतस्य भगवतः *स्मरणं* सम्भवतीति स्मरणमुक्तम् । तच्च शब्दाकर्णनकरणकं ज्ञानम् तस्य प्रीतिकरत्वं स्पष्टम्। *पादसेवनार्चा*दिकं तु गुणग्रामस्मरणाधीनमतः स्मरणोत्तरमुक्तम्। तच्च परमेश्वरप्रतिमासम्बन्धि गृहमार्जनलेपनादिरूपम्। अथवा 'अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुरि'ति वचनाद् भगवद्देहस्य ब्राह्मणस्य पादसेवनादि, भगवद्भक्तदेहस्य वा परमहंसादिरूपस्य सर्ववर्णाश्रमपूज्यत्वात्। तथा च **स्मृतिः** -

वासुदेवस्य द्वे रूपे चलं चाचलमेव च।
चलं संन्यासिनां रूपमचलं प्रतिमादिकम्॥
मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम्।
बाहुजातोरुजातानां नायं धर्मः प्रशस्यते॥ इति

ब्राह्मणेतरेण तु ब्राह्मणेतरस्य प्रेमभक्तस्य पादसेवनं कर्तव्यमेवेति न कश्चिद् विरोधः। गृहलेपनादिरूपपादसेवने कृते पाद्यादिसमर्चना-रूपमर्चनमभिलषतीति पादसेवेनोत्तर*मर्चन*मुक्तम्। तच्च पञ्चोपचारादि-रूपं पञ्चोपचारादिसाधनकेऽर्चने चिरमभिनिविशमानो भक्त आलोचयति किमस्याखिललोकनाथानामपि नाथस्य परमसात्त्विकमुनि-गणैर्मनसाऽर्च्यमानस्य मादृशेन वराकेणार्चनम्, तत अर्चनाभिनिवेशं त्यक्त्वा वन्दनेष्वेव कायिकादिषु निविशते। अतः अर्चनोत्तरं *वन्दन*मुक्तम्। तच्च पूजाबहिर्भूतनमस्कारः। प्रतिमादौ *दास्यं,* दासस्येव परमेश्वरप्रीतिफलकसकलकर्मानुष्ठानं, *'यत्करोषि यदश्नासि यज्जुहोषि ददासि यद्'* इत्यादि भगवदुक्तेः। तच्च त्रिविधम् पापक्षयमुद्दिश्य भगवत्प्रीतिमुद्दिश्य किमप्यनुद्दिश्य वा। तदुक्तं **कपिलेन** देवहूतिं प्रति—

कर्मनिर्हारमुद्दिश्य परस्मै वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः॥

कर्मनिर्हारं पापनाशनं, परस्मै परमेश्वराय, यष्टव्यम् भगवदाज्ञारूपेण वेदेन कर्तव्यतया बोधितमिति मत्वैव, न तु किमप्युद्दिश्य इत्यर्थः। एवं त्रिविधभावयुक्तः उत्तममध्यमादिभेदेन त्रिविधः सात्त्विक इत्यर्थः।

ननु पापक्षयरूपस्वगतफलकामेन क्रियमाणस्य कर्मणो दास्यरूपत्वे स्वर्गादिकामेन क्रियमाणमपि तथा स्यादिति चेन्न। पाप[1]स्येश्वरं प्रत्यापराधनजन्यत्वेन तत्क्षयकामेन क्रियमाणस्यापि दास्यस्यौचित्यात्। अपराधिनो हि प्रभुं प्रति दास्यमाचरन्तोऽपराधान्मुच्यन्त इति लोके दृष्टम्। ननु प्रभोः कोपहेतुर्व्यापारोऽपराध इति लोके व्यवहारः। पापजनकस्य निषिद्धाचरणस्यापराधत्वेन तथात्वं स्यादिति चेद्, भवत्येव फलमत

१. ईश्वरकोपस्य आज्ञोल्लंघनरूपनिषिद्धाचरणम्।

'उपपत्ते'रित्यधिकरणे भगवता **बादरायणेन** विहितनिषिद्धयोरीश्वर-प्रसादकोपजनकत्वोक्तेः। न च तथापि पापनाशफलक्रियायाः ईश्वर-प्रीतिफलकात् सम्भव इति वाच्यम्। कर्तृसुखजनकेश्वर-प्रीतिफलक्रियाया एव दास्यभक्तित्वात्। तदुक्तं प्रह्लादेन-

यस्तु आशिष आशास्ते न स भृत्यः स वै वणिक्।

आशास्ते इच्छति। भृत्यः दासः। एवञ्च कर्तृनिष्ठसुखफलकक्रियाया राजस-तामस-भक्तित्वेनोक्तत्वाद् अर्चनमध्ये निवेशो बोध्यः। तदुक्तं कपिलेन -

विषयानभिसन्धाय यश-ऐश्वर्यमेव वा।
अर्चादावर्चयेद् यो मां पृथग्भावः स राजसः॥

इति राजसत्रयम्। एवमभिसन्धाय यो हिंसां दम्भं मात्सर्यमेव वा संरम्भी भिन्नदृग्भावं मयि कुर्यात् स तामस इति तामसत्रयम्। संरम्भी क्रोधी। अत एव *'स्वकर्मणा तमभ्यर्च्ये'ति* **गीतोक्तिः**। न चैवम् पापनाशमुद्दिश्य कृतं श्रवणादिकमपि दास्यं स्यादिति वाच्यम् , दास्यलक्षणे श्रवणादिभिन्नत्वस्य निवेशात्। मातापित्रादीनां विष्णुबुद्ध्या दासवत् शुश्रूषणमपि दास्यं बोध्यम्। अथवा श्रवणादिलक्षणानां क्वचिन्मेलनेऽपि न दोषः, एकस्याः सात्त्विकभेदेनानेकभक्तित्वसम्भवात्। *सख्यं* प्रेमविशेषरूपम्। यथा सख्यौ प्रेमा तथा भगवति। यथा चोपादेयं भक्तादिकं प्राप्तं सख्ये निवेद्यते प्रेमविशेषपूर्वकं, तथा भगवति। यथा सख्युर्दूषणादिकं परेण क्रियमाणं सोढुं न शक्यते, तथा भगवति। यथायं मदिष्टसाधयिष्यत्येवेति विश्वासेन सख्युरनुवृत्तिः क्रियते, तथा भगवति। एतस्यापि प्रेमविशेषघटितस्य चिरानुष्ठितनिष्कामक्रियारूपदास्याधीन-चित्तशुद्ध्यधीनत्वाद् दास्योत्तरमुक्तिः।

आत्मनिवेदनम् स्वस्य विष्णोर्निवेदनम्। यथा विक्रीतस्य गवादेर्योगक्षेमचिन्तायामनभिनिवेशः तथा स्वतनोः। *'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्'* इति भगवदुक्तिं प्रतिसन्धाय सदा विष्णुरेव चिन्त्यः इत्यर्थः। यद्वा विष्णुरूपे सच्चिदानन्दघने साक्ष्यभेदेन साक्षात्कारे आत्मनिवेदनम्। एतस्या भक्तेरुक्तविश्वासादिरूपसख्याधीनत्वेन तदुत्तरमुक्तिः। अत्रेदं विवेचनीयम्-

श्रवणादीनां सगुण-निर्गुण-विषयकतया संकीर्णानां साधनभक्तित्वमेव, सख्यस्य तु साधनसाध्योभयभक्तित्वं, प्रेममात्रस्य साधनत्वेऽपि परमकाष्ठापन्नप्रेम्णः सगुण-निर्गुण-विषयकश्रवणादि-साध्यत्वात्। तदुक्तं **विष्णुपुराणे** प्रह्लादविष्णुसंवादे—

या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान् माऽपसर्पतु ॥

अनपायिनी अव्यभिचारिणी। त्वामनुस्मरतः त्वदीयं श्रवण-कीर्तनादिकुर्वतः। सा तादृशी। तादृशस्य सगुणनिर्गुणश्रवणादिसहितस्य चरमात्मनिवदेनरूपा ब्रह्मात्मैक्यसाक्षात्काररूपज्ञानलक्षणा भक्तिः फलम्-

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥

इति **श्रुतेः**। *'मयि चानन्योगेन भक्तिरव्यभिचारिणी'* इति **गीतो**क्ततादृशप्रेमरूपचरमभक्तेर्ज्ञानसाधनत्वोक्तेः। च-कारेण पूर्वोक्तस्य अमानित्वमदम्भित्वमित्यादिसाधनसमूहस्य समुच्चयः।

भागवतेऽप्युक्तम्-

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे॥

श्रुतिमात्रेण उपस्थितिमात्रेण, गुणोपस्थितिरूपेण कारणेन तत्कार्यस्योक्तप्रेम्णो ग्रहणम्, तस्यैव निर्गुणभक्तिचरमसाधनत्वात्। सर्वगुहाशये सर्वदृश्याधिष्ठानभूते। अविच्छिन्ना 'सर्वं विष्णुरेवे'त्याकारेति यावत्। मनोगतिर्मनोवृत्तिः। यथा गङ्गा पूर्वपश्चिमादिसमुद्रभागेषु धाराचतुष्टयेन गच्छन्ती सर्वेषु समुद्रभागेषु संबध्यते, तथैव मनोवृत्तिरपि सकलदृश्यावच्छिन्नेषु सद्भागेषु सम्बध्यते। ब्रह्माण्डस्यान्तर्बहिश्च सर्वं विष्णुरेवेति, सर्वानुस्यूततया सर्वदृश्यानाञ्चाधिष्ठानतया क्रमेण जायत इति यावत्। स्वरूपमुक्त्वा लक्षणमाह — *लक्षणमिति*। अहैतुकी फलानुसन्धानशून्या। न हि ज्ञानस्य फलमस्ति, तस्य सकलदृश्यविरोधितया मोक्षं प्रति व्यञ्जनकत्वमात्रस्वीकारात्। अव्यवहिता 'अहमेव विष्णु'रिति स्वाभेदेन क्रियमाणा। अत एव **बृहन्नारदीया**दावुक्तम्-

अहमेव परो विष्णुर्मत्तः सर्वमिदं जगत्।
इति यः सततं पश्येत्तं विद्यादुत्तमोत्तमम्॥

विष्णुपुराणे चोक्तम्-

ज्योतींषि विष्णुर्भुवनानि विष्णु-
र्वनानि विष्णुर्गिरयो दिशश्च।
नद्यः समुद्राश्च स एव सर्वं
यदस्ति यन्नास्ति च विप्रवर्य॥

तस्मान्न विज्ञानमृतेऽस्ति किञ्चित्
क्वचित् कदाचिद् द्विज वस्तुजातम्।
विज्ञानमेकं निजकर्मभेदै-
र्विभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥

एवं सदेकं परमं परेशः
स वासुदेवो न यतोऽन्यदस्ति।
एकः समस्तं यदिहास्ति किञ्चित्
तदच्युतो नास्ति परं ततोऽन्यत्॥

सोऽहं स च त्वं स च सर्वमेतद्
आत्मस्वरूपं त्यज भेदमोहम्।
इतीरितस्तेन स राजवर्यस्
तत्याज भेदं परमार्थदृष्टिः॥

एकमेवमिदं ब्रह्म न भेदि[1] सकलं जगत्।
वासुदेवाभिधानस्य स्वरूपं परमात्मनः॥

तदेतदुपदिष्टं ते संक्षेपेण महामुने।
परमार्थसारभूतं यदद्वैतमशेषतः॥

तद्भावभावनापन्नस्ततोऽसौ परमात्मना।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत्॥ इति।

तत्रैव किंकारान् प्रति यमवचनम्-

सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः।
इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान् विहाय दूरात्॥

---

१. न भेदनिरूपक इति यावत्।

एतेन शर्करातद्धोजिनोरिवेति वैष्णवंमन्यमानानामुद्गार अपास्तः। स च ब्रह्मसाक्षात्कारहेतुः परमप्रेमा त्रिधा—

तस्यैवाहं ममैवासौ स एवाहमिति त्रिधा।
भगवच्छरणत्वं स्यात् साधनाभ्यासनामतः॥ इति

स एवाहमिति सफलावस्थापि साधनसमकक्षतया उक्तसाधनस्य प्रेम्ण एव साध्यरूपापत्त्याऽनतिभेदात्। वस्तुतस्तु तादृशप्रेमरूपसख्यभक्तेः फलमात्मनिवेदनमेव उक्तपद्ये त्रिविधत्वेनोक्तम् । तत्राद्यम् 'तस्यैव पाल्योऽह'मित्याद्याकारत्वात् स्वीयपालनादित्यागेन विष्णुचिन्तारूपम्। द्वितीयं तु प्रेमातिशयेन इतरजीवादिद्वैततिरोधानान् ममैवासौ सेव्य इत्याद्याकारम्। तृतीयं तु सेव्यसेवकभावादिभेदस्यापि तिरोधानात् सच्चिदानन्दघनमात्ररूपविष्णुप्रेमरूपमिति विवेकः। तस्यैषा परमप्रेम्णः साधनरूपा श्रवणादिभक्तिस्तत्साध्यात्मनिवेदनपर्यन्ता नवविधापि, पूर्वोक्तोत्तमसात्त्विकादिभेदेन एकाशीतिभेदा भवतीति शिवम्। तस्माद् भक्तिं विना तत्त्वज्ञानं न सिद्ध्यतीति मुमुक्षुणा महान् प्रयत्नः कर्तव्यः इति। एतेन कर्मकाण्डस्यापि ज्ञानहेतुत्वं सिद्धम्, दास्यभक्तेः कर्मकाण्डान्तर्भूतत्वात् *'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते'* इति भगवद्वचनाच्च। **मनुना**ऽप्युक्तम्-

यथोक्तान्यपि कर्माणि परिहाप्य द्विजोत्तमः ।
आत्मज्ञाने शमे च स्याद् वेदाभ्यासे च यत्नवान् ॥
एतद् द्विजन्मनामग्र्यं ब्राह्मणस्य विशेषतः।
प्राप्यैतत् कृतकृत्यो हि द्विजो भवति नान्यथा ॥

ननु *'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'* इति श्रुत्या वेदानुवचनशब्दः फलति। तस्य ब्रह्मचारिधर्मस्य, यज्ञदानशब्दाभ्यामुपलक्षितस्य वानप्रस्थधर्मस्य नित्यस्य नित्येनैव हितेन चेष्टितेन पापक्षयद्वारेण आत्मज्ञानार्थत्वं बोध्यते। न च विविदिषां प्रति विनियोगवैयर्थ्यं ज्ञानमुत्पद्यते पुंसां, क्षयात् पापस्य कर्मणः इति वाच्यम्। विनियोगाभावे हि सत्यपि कर्मानुष्ठाने ज्ञानं स्याद् वा न स्यात्, सति तु विनियोगे ज्ञानमवश्यं भवेदेव इति नियमार्थत्वात्। तस्मान्नित्यानामेव कर्मणां वेदने विविदिषायां वा विनियोगस्य श्रुत्या बोधितत्वात् कथमुक्तम् *'सर्वं कर्म ज्ञाने परिसमाप्यत'* इति केचित्।

सत्यम्। सर्वेषां काम्यनित्यसाधारणानां च प्रतिपादकोक्तफलत्याग-पूर्वकम् अन्तःकरणशुद्ध्यर्थतया विविदिषासंयोगेनानुष्ठानं सम्भवति। यथा *'खादिरो यूपो भवति, खादिरं वीर्यकामस्य यूपं करोती'*त्यत्र एकस्य खादिरत्वस्य क्रतुप्रकरणे पाठात् फलसंयोगाच्च क्रत्वर्थत्वं पुरुषार्थत्वं च प्रमाणभेदात् स्वीक्रियते। तथाऽग्निहोत्रेष्टिपशुसोमानां सर्वेषामपि **शतपथ**पठितानां स्वोत्पत्तिविधिसिद्धान्तानां तत्तत्फलसंयोगः, प्रत्येकेन वाक्येन विविदिषासंयोगश्च यज्ञेनेत्यादिवाक्येन क्रियते। एकस्योभयत्वं संयोगपृथक्त्वन्यायात्। विनियोजकभागो वेदस्य शतपथः, विनियोज्यभागः संहिता, कर्ममात्रबोधको विधिः स्वोत्पत्तिविधिरित्यर्थः। तस्मात् काम्यान्यपि फलाभिसन्धिमकृत्वा अन्तःकरणशुद्धये कर्तुं शक्यन्ते। न हि अग्निहोत्रादिकर्मणां स्वतः काम्यत्वनित्यत्वरूपो विशेषोऽस्ति किन्तु पुरुषाभिप्रायभेदकृत एव, फलाभिसन्धित्यागे तु कुतः सः। तदुक्तं **वार्तिककृद्भिः**-

वेदानुवचनादीनामैक्यात्मज्ञानजन्मने।
तमेतमिति वाक्येन नित्यानां वक्ष्यते विधिः॥

यद्वा विविदिषार्थत्वं सर्वेषामेव कर्मणाम्।
तमेतमिति वाक्येन संयोगस्य पृथक्त्वतः॥

*****

इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीब्रह्मानन्दसरस्वतीभगवत्पूज्यपादशिष्य-
श्रीसदानन्दविरचिते स्वरूपप्रकाशे तत्त्वज्ञानसाधनत्वेन भगवद्भक्ति-
तत्साधनविहितकर्मनिरूपणपूर्वकभगवत्तत्त्वनिरूपणेन
तत्पदार्थप्रकाशनं नाम तृतीयः परिच्छेदः॥

॥ चतुर्थः परिच्छेदः ॥

॥ जीवब्रह्मैश्वर्यप्रकाशनम् ॥

परिच्छेदत्रयेण प्राक् दृक्पदार्थः प्रकाशितः । अनन्तरपरिच्छेदे दृश्यं सम्यक् प्रकाश्यते। तथा हि— दृश्यं त्रिविधम्, अव्याकृतामूर्त्त-मूर्त्तभेदात्। तत्र साभासाऽविद्या चैतन्यतादात्म्यापन्ना मूर्त्तामूर्त्तप्रपञ्च-बीजरूपा भवति। न च *'जीव ईशो विशुद्धाचिद्विभागश्च तयोर्द्वयोः। अज्ञानं तच्चितोर्योगः षडस्माकमनादय'*इत्यनादिषट्कस्य तद्भिन्नत्वेन कथं सर्वप्रपञ्चबीजरूपत्वमिति वाच्यम् । तद्भिन्नत्वेऽपि तन्निवृत्तौ निवृत्त्यभ्युपगमेन तदतिरेकात्। सा च स्वयमचेतनापि चैतन्येनोज्ज्वलिता पूर्वपूर्वजीवकर्मप्रयुक्तसंस्कारवती शब्दस्पर्शरूपरसगन्धात्मकानि आकाशवायुतेजोजलपृथिव्याख्यानि पञ्चमहाभूतानि जनयति, *'अजामेकां लोहितेति'*श्रुतेः।

न च कालाकाशादीनामनादित्वात् कथमुत्पत्तिरिति वाच्यम्, कल्पादावुत्पन्नस्याकाशस्य आकल्पस्थायित्वेन तथा प्रतीतेः, प्रवाहानादित्वस्येष्टत्वाच्च, तथा च श्रुतिः— *'एतस्मादात्मन आकाशः सम्भूतः, आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी'*त्यादि। दिक्कालौ त्वप्रामाणिकौ, आकाशस्यैव दिग्व्यवहारस्वीकारात्, अविद्या-चित्-संबन्धस्वरूपस्य कालस्य च स्वमते ईश्वरानतिरेकात्। एवमविद्यात एवान्धकारोऽपि भावरूप एवावरणात्मा चाक्षुषज्ञानविरोधी आलोकनाश्यश्च झटिति महाविद्युदादिवदाविर्भवति तिरोभवतीति च स्वमते सिद्धान्तः।

संसारहेतुदेहोत्पादनत्वाभावाच्च न श्रुतिषु सृष्टिप्रक्रियायाम् आम्नात इत्यविरोधः। तथा चायमेवाव्याकृत पदार्थ ईश्वरोपाधिः। तानि च सूक्ष्माण्यपञ्चीकृतानि पञ्चमहाभूतानि अमूर्त्ताख्यानि कारणैक्यात् सत्त्वरजस्तमोगुणात्मकानि सत्त्वांशप्राधान्येन ज्ञानशक्त्यात्मकं क्रियाशक्त्यात्मकं मोहशक्त्यात्मकं च जीवोपाधिभूतम् एकं स्वच्छन्दाख्यं विचित्ररूपमिव मिलित्वा जनयन्ति, तथा च श्रुतिः- '*तदव्याकृतं मनो लिङ्गशरीरम्। तन्मनोऽसृजदि*'त्यादि। तस्य च ज्ञानशक्तिप्रधानोंऽशोऽन्तःकरणम् । तच्च बुद्धिर्मन इति । तत्र बुद्धिरपि द्विविधा— चित्ताहङ्कारभेदेन। तदुक्तम् —

मनोबुद्धिरहंकारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥

क्रियाशक्तिप्रधानोंऽशः प्राणः। स च पञ्चधा— प्राणापानव्यानोदान-समानभेदेन । तत्र प्राग्गमनवान् वायुः प्राणः नासादिस्थानवर्ती, अर्वाग्गमनवान् अपानः पाय्वादिस्थानवर्ती, विष्वग्गमनवान् व्यानः सर्वशरीरवर्ती, ऊर्ध्वगमनवान् उत्क्रमणवायुरुदानः कण्ठस्थानवर्ती, अशितपीतादिसमीकरणः समानः। मोहशक्तिप्रधानोंऽशस्तु निद्रालस्यादिः।

एवमेकैकभूतेभ्यो ज्ञानक्रियाशक्तिभेदात् प्रत्येकम् इन्द्रियद्वयं जायते। आकाशात् श्रोत्रवाचौ, वायोस्त्वक्पाणी, तेजसश्चक्षुः पादौ, अद्भ्यो रसनापायू, पृथिव्या घ्राणोपस्थौ चेति। एतेषामधिष्ठातारो देवा अपि ज्ञानक्रियाशक्तिभेदाद् दिगग्नी, वातेन्द्रौ, आदित्यविष्णू , वरुणमित्रौ, अश्विप्रजापतीति। मन-आदीनां चतुर्णां तु क्रमेण चन्द्राच्युतचतुर्मुख-चन्द्रचूडा अधिष्ठातारो देवाः भवन्ति । शब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि। त्वक्चक्षुषी

स्वग्राह्यगुणाश्रयद्रव्यमपि गृह्णीतः, श्रोत्रमपि चक्षुर्बाह्यग्राहकम्, दूरे शब्द इति प्रत्ययात्। वचनादानगमनविसर्गानन्दजनकानि वाक्पाणि-पादपायूपस्थाख्यानि कर्मेन्द्रियाणि। एतच्च सर्वं मिलित्वा सप्तदशात्मकं लिङ्गम् इह लोकपरलोकयात्रानिर्वाहकम्। स्वोपाधिभूतस्य जीवचैतन्यस्य ब्रह्मज्ञानपर्यन्तमस्य स्थायित्वं स्वीकृतम्। तदुक्तम् —

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्॥ इति

अत्र ज्ञानशक्तिप्राधान्येन हिरण्यगर्भः, क्रियाशक्तिप्राधान्येन सूत्रात्मेत्युच्यते। एतदभिप्रेत्यैव पूर्वं लिङ्गशरीराणां समष्टिर्हिरण्यगर्भ इत्युक्तम्। अत्र व्यष्टौ समष्टौ च जीवोपाधिरेव। अयमेवामूर्तपदार्थः न तु तार्किकादिस्वीकृतः। तानि च तथाभूतानि महाभूतानि भोगायतनं शरीरं, भोग्यञ्च विषयमन्तरेण, भोगं जनयितुं न शक्नुवन्ति, तेन जीवकर्मप्रयुक्तत्वात् स्थौल्याय पञ्चीकृतानि भवन्ति। तत्र प्रत्येकं भूतानि द्विधा विभज्य एकैको भागश्चतुर्धा विभज्यते। तद्भागचतुष्टयस्य स्वभागं विहायेतरभूतचतुष्टयार्धभागेनेतराष्टमभागेन पञ्चीकरणान् मेलनेऽप्याधिक्याद् आकाशादिवद् व्यवहारः। तानि च पञ्चीकृतानि पञ्चमहाभूतानि मूर्त्ताख्यानि मिलित्वैकं कार्यम् इन्द्रियाणामधिष्ठानं भोगायतनं जनयन्ति, तदेव शरीरमुच्यते। तच्चातुर्विध्यं तु प्राक् प्रदर्शितम्।

एवं चतुर्दशभुवनात्मकं घनोदकाख्यमहाजलराशिमध्ये ऊर्ध्वाधोभावमापन्नं संयुक्तकटाहद्वयं तिष्ठति। तन्मध्येऽपि जलराशिः। तदुपरि महानौरिव पञ्चाशत्कोटियोजनविस्तीर्णा महापृथिवी सप्ततिसहस्रयोजनोन्नता, तस्याः दशदशसहस्रयोजनपरिमितभागेषु अधोऽध एकैकं पातालम्, इत्थं सप्तपातालानि स्वर्लोकादपि रम्याणि।

तदुपरि सप्तभुवनानि। तत्र पादगम्यो भूर्लोकः, तदुपरि भुवः स्वर्महर्जनस्तपस्सत्यलोका इति षड् भुवनानि संयुक्तकटाहद्वयमध्यस्थानि। कटाहद्वयस्योर्द्ध्वाधोभावापन्नं यद् घनोदकं तदेव त्रिविक्रमाख्यविष्णुचरणसरोजाङ्गुष्ठलग्नच्छिद्रद्वारा कटाहान्तःप्रविष्टं शिशुमारचक्रसुमेर्वादिपतनद्वारा हिमालयादवतीर्णं गङ्गारूपेण त्रिलोकीं पावयति इति। तदेवं सत्त्वरजस्तमोंऽशात्मकं पञ्चीकृतं पञ्चभूतात्मकं सर्वं ब्रह्माण्डमित्युच्यते। अयमेव मूर्तः पदार्थः, इत्यौपनिषदः सृष्टिक्रमः ।

एतद्विपरीतो लयक्रमः प्रलयपर्यन्तः । तत्र प्रलयो नाम त्रैलोक्यनाशः। स हि चतुर्विधः-- नित्यः, प्राकृतो, दैनन्दिन आत्यन्तिकश्च। तत्र नित्यप्रलयः सुषुप्तिः, तस्याः सकलकार्यविलयस्वरूपत्वात् । धर्माधर्मसंस्काराणां च तदा कारणात्मनाऽवस्थानम् , तेन सुप्तोत्थितस्य न सुखदुःखाद्यनुपपत्तिर्न वा स्मरणानुपपत्तिः । एतस्य च प्राग् दर्शितत्वादनन्तरं त्रैविध्यं प्रकाश्यते तथा हि— पञ्चीकृतपञ्चमहाभूततत्कार्यात्मकं विराडाख्यं मूर्त्तं पृथिव्यादेरेकैकम् अमूर्त्तेऽपञ्चीकृतपञ्चमहाभूतात्मके हिरण्यगर्भाख्ये स्वकारणे लीयते । अमूर्त्तं चाव्याकृते परमेश्वरोपाधौ। अव्याकृतस्य त्वनादित्वेनैव कारणाभावान्न लयः '*स्वकारणे सूक्ष्मरूपेणावस्थानं लय*' इति लक्षणात्। अयमेव प्राकृतः प्रलयः। प्रकृतौ संस्काररूपेणावस्थानस्यैव प्राकृतशब्दार्थत्वात् । तद्धयेतत्तर्हि अव्याकृतमासीत्, '*नासदासीन्नो सदासीत्*' '*तम आसीत्*' इत्यादि प्राकृतप्रलये जगतः सद्रूपेणावस्थानात् , '*सदेव सौम्येदमग्र आसीदि*'त्यादि श्रुत्यन्तरं च । दैनन्दिनस्तु त्रिंशत्संज्ञासंज्ञितोऽपि न संस्काररूपेण किन्तु पृथिव्यादेः शतवर्षीयानावृष्ट्या शुष्कगोमयाकारेणावस्थितिपूर्वकत्वे सति संकर्षणमुखानलेन भूर्भुवःस्वारूपलोकत्रयदाहात् तत्तापाक्रान्त्या महर्लोकस्थेषु जनलोकं गतेषु हिरण्यगर्भस्य सत्यलोकस्थस्य रात्रिर्भवति, स एव दैनन्दिनः प्रलयः ।

तत्र महर्लोकस्य तापितत्वेन निर्जनत्वेऽप्यनाशात् जनलोकादौ च तापितत्त्वस्याप्यभावात् विराजः सम्पूर्णस्य न लयः किन्तु दशभुवनीरूपैकदेशावच्छिन्नस्येति। तदुक्तं—

त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना।
यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः ॥

त्रिंशत्संज्ञाभेदास्तु **मात्स्ये**, मनुरुवाच—

कल्पमानं त्वया प्रोक्तं मन्वन्तरयुगेषु च ।
इदानीं कल्पनामानि समासात् कथयाच्युत ॥

मत्स्य उवाच—

कल्पानुकीर्तनं वक्ष्ये सर्वपापप्रणाशनम्।
यस्यानुकीर्तनादेव वेदपुण्येन योज्यते ॥
प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः।
वामदेवस्तृतीयस्तु ततो रथन्तरः परः ॥
रौरवः पञ्चमः प्रोक्तः षष्ठः प्राण इति स्मृतः ।
सप्तमः स बृहत्कल्पः कन्दर्पोऽष्टम उच्यते॥
सद्योऽथ नवमः प्रोक्तः ईशानो दशमस्तथा।
ध्यान एकादशः प्रोक्तस्तथा सारस्वतोऽपरः॥
त्रयोदश उदानस्तु गारुडोऽथ चतुर्दशः ।
कौर्मः पञ्चदशः प्रोक्तः पौर्णमासी प्रजापतेः॥
षोडशो नारसिंहस्तु प्रधानस्तु ततोऽपरः ।
आग्नेयोऽष्टादशः प्रोक्तः सोमकल्पस्ततः परः॥
मानवो विंशतिः प्रोक्तस्तत्पुमानिति चापरः।
वैकुण्ठस्तु ततः प्रोक्तो लक्ष्मीकल्पस्ततः परः॥
चतुर्विंशतमः प्रोक्तः सावित्रीकल्पसंज्ञकः ।

पञ्चविंशस्ततो घोरो वरारोहस् [वाराहस्तु] ततः परः ॥
सप्तविंशोऽथ वैराजो गौरीकल्पस्ततोऽपरः ।
माहेश्वरस्ततः प्रोक्तस्त्रिपुरो यत्र घातितः ॥
पितृकल्पस्तथाऽन्ते तु, ऊचुर्वै ब्राह्मणादयः[1] ।
इत्येष ब्रह्मणो मासः सर्वपातकनाशनः ॥ इति ।

ब्रह्मज्ञानेनोच्छेदस्त्वात्यन्तिकः प्रलयः, पुनः संसाराभावात् । स च कारण-क्रमे 'तद् ब्रह्मे'ति स्वरूपमात्रे आकांक्षामुत्थाप्य 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादि श्रुतिभिः स्वरूपलक्षणेनैव बोध्यते, लक्ष्यलक्षणयोरभेदात्, खं छिद्रमितिवत् स्वरूपे प्रविष्टत्वात्, तदुक्तम्— '*तटस्थं स्वरूपं द्विधा लक्षणं च, स्वरूपेऽप्रविष्टं स्वरूपे निविष्टम्*'। असन्निहितपूर्वकेतरव्यावर्तकत्वे सति विशेष्यात् 'त्वम'प्युपलक्षणम्, यथा 'काकवन्तो गृहा, रवं विलम्ब' एवं 'त्वं'-पदस्यापि द्वावर्थौ, वाच्यलक्ष्यौ। तत्र जाग्रत्स्वप्नसुषुप्सादिविशिष्टं चैतन्यं वाच्योऽर्थः। स च '*तद्यथा महामत्स्य उभे कूलेऽनुसञ्चरति एवमेवायं पुरुष एतावुभावन्तावनुसञ्चरति, स्वप्नांतं-शुद्धान्तं*' चेत्यादि श्रुतिभिः प्रतिपाद्यते तटस्थलक्षणेन। तद्रहितं तद्भासकं सच्चिदानन्दघनं तु लक्ष्यम् । तच्च '*योऽयं विज्ञानमयः प्राणेषु हृद्यन्तरज्योतिः पुरुषो न दृष्टे दृष्टान्तरं पश्येददृष्टो हि द्रष्टा*' इत्यादि श्रुतिभिः स्वरूपलक्षणेनैव प्रतिपाद्यते। एवमवान्तरवाक्येभ्यः शुद्धं 'त्वं'पदार्थशुद्धत्वम्।

पदार्थ-बोधानन्तर'*मात्मविदात्मैव भवति*' '*तरति शोकमात्मवित्*', '*तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति*' स्वरूप-ज्ञानस्यैव मोक्षहेतुत्वमवगम्य ततः कोऽहमिति आकांक्षायां परमकारुणिकेन

---

१. *...या कुहूर्ब्रह्मणः परा,* इति पुराणे पाठान्तरम्, *सं०*

वेदेन 'तत्त्वमसी'त्युपदिष्टम् । ततः संसार-संसारिणोः कथमैक्यमिति विरोधस्फूर्त्त्या मुख्यार्थभेदानुपपत्तिर्भवति। ततो जहदजहल्लक्षणया 'सोऽयं देवदत्त' इतिवत् तत्कालतद्देशपरित्यागेनाविरुद्धे देवदत्तांश-साक्षात्कारवत्पदद्वयेऽपि शबलांशत्यागेन, अथवा जहल्लक्षणया सर्वांशत्यागेन 'गंगायां घोष' इतिवत् स्मरणोपपत्त्या अखण्डसाक्षात्कारः॥ अखण्डत्वं तु सजातीय-विजातीय-स्वगत-भेद शून्यत्वम्। सजातीयत्वं तु तार्किकादिस्वीकृतम् आत्मनानात्वम् । विजातीयत्वं तैरेव स्वीकृतं परमाण्वादिनित्यवर्गत्वम्। स्वगतभेदत्वं तु स्वमते संसार-दशायामुपाधिभेदाद् भेदत्वं, तत्-शून्यत्वमित्यर्थः। अथवा विना शक्तिं, विना लक्षणां, विना संबन्धान्तरं सुप्तोत्थापकवाक्यवत् तत्त्वमस्यादि-वाक्येन अखण्डसाक्षात्कारः, शब्दशक्तेरचिन्त्यत्वात् । न च विना संबन्धबोधनेऽतिप्रसङ्गलक्षणपक्षेऽपि तुल्यत्वात् शक्तसंबन्धस्य अनेकसाधारणत्वात् तात्पर्यविशेषो नियामक इति चेत् , तस्यापि सर्वान् प्रति अविशेषात् । कश्चिदेव तात्पर्यविशेषमवधारयति न सर्व इति चेत्, हन्त तर्हि पुरुषगत एव कश्चिद् विशेषो निर्दोषत्वादिरूपो नियामकः स चास्मिन्नपि पक्षे न दण्डवारितः। एतस्मिन् पक्षे शब्दवृत्त्यविषयत्वाद् *'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'* इत्यादि श्रुतयः प्रमाणम्। तदुक्तं **वार्त्तिके–**

दुर्बलत्वादविद्याया आत्मत्वाद् बोधरूपिणः ।
शब्दशक्तेरचिन्त्यत्वाद् विद्मस्तं मोहहानतः ॥१॥
अगृहीत्वैव संबन्धमभिधानाभिधेययोः ।
हित्वा निद्रां प्रबुध्यन्ते सुषुप्तौ बोधिताः परे ॥२॥
जाग्रद्वन्न यतः शब्दं सुषुप्तौ चेति कश्चन ।
ध्वस्ततो ज्ञानतोऽज्ञाने ब्रह्मास्मीति भवेत् फलम् ॥३॥
अविद्या याति नो शब्दाद्याऽहं ब्रह्मेति धीर्भवेत् ।
न पश्यत्यविद्यया सार्द्धं हत्वा रोगमिवौषधम् ॥

तस्मात् तत्त्वमस्यादिवाक्यजन्याखण्डाकारमनोवृत्त्या सजातीय-प्रत्ययपूर्वकविजातीयप्रत्ययरहितयाऽविद्यया तत्कार्यसकलानर्थ-निवृत्तिरिति शिवम्। तदुक्तं वार्त्तिककृद्भिः-

तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः ।
अविद्यासहकारेण नासीदस्ति भविष्यति ॥

अयमेव सविलासाज्ञाननाशरूपो बाध इति प्रथमपरिच्छेदे निरूपितः। सृष्टिप्रलयादिप्रपञ्चनिरूपणं सर्वं स्वप्नसृष्टिवद् अपारमार्थिकमपि उन्निद्रवासनादार्ढ्यात् मिथ्यात्वज्ञानात् पूर्वम्, ऊर्ध्वं वा तत्त्वसाक्षात्कारात्, पूर्वं च निष्कम्पप्रवृत्तिक्षमं, तत्त्वसाक्षात्कारानन्तरं तु नैव प्रवृत्त्यादि-बलवत्तरप्रारब्धवशात् सकम्पप्रवृत्तिजनकं वा ।
तदुक्तम् —

शास्त्रेण नश्येत् परमार्थबुद्धिः
कार्यक्षमं नश्यति चापरोक्षात् ।
प्रारब्धनाशात् प्रतिभासनाश
एवं त्रिधा नश्यति चात्ममाया ॥ इति ।

तथा चैवंप्रकारेण मायानिवृत्त्युपलक्षित आत्मैव मोक्षः। निवृत्तिश्चोच्छेद एव। तत्र च दृश्याधिकरणक्षणे दृश्याधिकरणक्षणपूर्वत्वानधिकरणत्वम्, चरमतत्त्वज्ञानोत्पत्तिक्षणे च दृश्याधिकरणक्षणपूर्वकत्वं नास्ति; स्वमते तदुत्तरक्षणस्य अप्रसिद्धत्वात्। स चैकजीववादे युगपदेव, नानाजीववादे तु क्रमेण।

नन्वेवं तत्त्वज्ञानादेकस्य मुक्तौ सर्वमुक्तिः स्यात्, अविद्याया एकत्वादिति चेदिष्टापत्तिरित्येके । अपरे त्वेतद्दोषपरिहाराय *'इन्द्रो मायाभिः पुरुरूप ईयते'* *'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्*

यथर्षीणां तथा मनुष्याणा' मित्यादिबहुवचनं श्रुत्यनुगृहीतम-विद्यानामात्मत्वमङ्गीकर्त्तव्यमित्याहुः-

वीतरागभयक्रोधा मन्मया मामुपासिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥

इति भगवद्वचनाच्च । प्रतिजीवं संसारभेदश्च । न च 'यो घटो मया दृष्टः स एव त्वयेति' कथमिति वाच्यम् । सादृश्याद् एकस्यां शुक्तौ दशपुरुषीयभ्रमवत्। अन्ये तु एकैवाविद्या, यावज्जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना । तथा च यस्य ब्रह्मज्ञानमुत्पद्यते तस्यैव ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः, न त्वन्यस्येति प्रतीत्यभ्युपगमान्नैकमुक्तौ सर्वमुक्तिप्रसङ्गः। प्रारब्धस्य विद्यमानत्वात् न चाविदेहकैवल्यम्। अत एव यावदधिकारमवस्थितिः 'अधिकारिकारणम्' इत्यस्मिन्नधिकरणे अधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानाम् इन्द्रादीनां देहधारणानुपपत्तिमाशङ्क्य अधिकारापादकप्रारब्धकर्मसमाप्त्यनन्तरं विदेहकैवल्यमिति सिद्धान्तितम्, इति दिक् ।

वस्तुतस्त्वेकजीववाद-नानाजीववादादिविभ्रमाणां तत्त्वज्ञानात् प्रागेवानुभव अविद्याविजृम्भितत्वात् । अत एव तत्र दृढतराभिनिवेशेन वादिनां स्वपक्षस्थापन-परपक्षदूषणप्रयासः सम्भवति। न त्वद्वितीयात्म-तत्त्वसाक्षात्कारानन्तरं स्वातिरिक्तप्रपञ्चजातस्य मायागन्धर्वनगरवत् मिथ्यात्वस्फुरणेनाविद्यातत्कार्यस्यैवालीकत्वात्। तथा चाविद्यावत्पुरुष-दृष्ट्यैवाविद्या तत्कार्यञ्च, न तु विद्वद्दृष्ट्या । तदुक्तं **वार्त्तिककृद्भिः-**

अहमेव परं ब्रह्मेत्यस्यार्थस्याप्रबुद्धता ।
अविद्येति वयं ब्रूमो येह नास्ति सदात्मनि ॥

अविद्यमानैवाविद्या वस्तुतत्त्वविचारिणाम् ।
अविचारेण मूढानां वज्रादपि दृढायते ॥
तस्मादुत्पन्नतत्त्वस्य मास्त्वविद्या चिदात्मनि ।
अव्युत्पन्नस्य दृष्ट्यैषा न वेद्मीत्यनुभूयते ॥ इति

श्रुतिश्च विद्वदनुभवे प्रमाणम्—
न विरोधो न चोत्पत्तिर्न बन्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥

स्मृतिश्च–
कालोऽनादिस्तत्र मुक्तः शुकादिः
कालोऽनन्तो मोक्ष्यते तत्र चान्यः ।
इत्येवं वै बन्धमोक्षव्यवस्था
संसिद्धः स्यादात्मपरप्रबोधात् ॥

वासिष्ठे-
अनात्मन्यात्मधीर्बन्धो तन्नाशो मोक्ष उच्यते ।
बन्धमोक्षौ न विद्येते नित्यमुक्तस्य चात्मनः ।

अद्वैतमकरन्देऽपि-
आत्माज्ञानमहानिद्राजृम्भितेऽस्मिन् जगन्मये ।
दीर्घस्वप्ने स्फुरन्त्येते स्वर्गमोक्षादिविभ्रमाः ॥

ननु तर्हि कथं कल्पितबन्धनिवृत्त्यर्थं मुमुक्षूणां श्रवणादौ प्रवृत्तिरिति चेत्, उच्यते–

पूर्वोक्ततत्त्वज्ञानात् प्राक् सत्यतया आत्मन्यनुभूयमानस्य संसारदुःखस्य निवृत्त्यर्थं प्रवृत्त्युपपत्तेः, कल्पितस्यापि दुष्टस्वप्नरूपपापस्य प्रायश्चित्तार्थं

प्रवृत्तिदर्शनाच्च। एतेन यद्येकैकस्मिन् कल्पेऽप्येकैकोऽप्यपवृजेत् तदाप्युच्छिन्नः संसारः स्यादतीतकल्पानामनन्तत्वात् तथा च प्रवृत्तिरेव श्रेयसी न निवृत्तिरित्यादि **प्राभाकरादि**मतमप्यपास्तम् । न हि श्रुतिस्मृतिसिद्धस्य मुक्तानुभवसिद्धस्य च मोक्षस्यानन्तरप्रवृत्तेनासत्तर्केण बाधः कर्तुं शक्यते। श्रुतिप्रमाणापेक्षयाऽनुमानादिप्रमाणानां दुर्बलत्वं शास्त्रे प्रसिद्धत्वात् सर्वस्यापि श्रुतिस्मृतीतिहासपुराणादिवाङ्मयस्य मोक्षप्रतिपादने पर्यवसन्नस्यानर्थकत्वं च स्यादिति। विस्तरस्तु **स्वरूपनिर्णये**ऽनुसन्धेय इति दिक्।

नन्वस्त्वेवम् विद्वदविद्वदनुभवस्तथाप्यविद्यानिवर्तकं स्वरूपचैतन्यं, तदाधाररूपा वृत्तिर्वा ? नाद्यः, तस्येदानीमपि सत्त्वात्। न द्वितीयः, तस्याश्चिद्भिन्नत्वेनासत्त्वात् तथा चासत्यात् सात्त्यसिद्धेरयोगात्। जानामीति ज्ञप्तिरूपचिद्विरोधस्यैवानुभवसिद्धत्वादिति चेन्न। अविद्यानिवर्तकं यद्यपि न स्वप्रकाशं स्वरूपचैतन्यं तस्याविद्यासाधकत्वात् तथापि श्रवणादि-साध्यापरोक्षवृत्तिसमारूढं तदेव निवर्तकं भवति । तदुक्तं **वार्त्तिके**-

तृणादेर्भासिकाप्येषा सूर्यदीप्तिस्तृणं दहेत् ।
सूर्यकान्तमुपारुह्य तं न्यायं चिति योजयेत् ॥ इति

ननु तर्हि सविलासाविद्यानाशकं ब्रह्मज्ञानं कथं नश्येन् नाशकान्तराभावादिति चेत्, शृणु-

यथा कतकरजः सलिलेन संयुज्य पूर्वयुक्तरजोऽन्तरविश्लेषं जनयत् स्वविश्लेषमपि जनयति, तथात्मन्यध्यस्यमानं ब्रह्मज्ञानं पूर्वाध्यस्तसमस्तप्रपञ्चं निवर्तयत् स्वात्मानमपि निवर्तयतीति । तदुक्तम्—

अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्धि निर्मलम् ।
कृत्वा ज्ञानं स्वयं नश्येत् जलं कतकरेणुवत् ॥

अथ केयमविद्यानिवृत्तिः ? आत्मरूपा, तदतिरिक्ता वा ? आद्ये असाध्यत्वापत्तिः। द्वितीयेऽपि किं मिथ्या, सती वा ? आद्ये अविद्या-तत्कार्यान्यतरापत्तिः, द्वितीये अद्वैतहानिरिति चेन्नैवम्; चरम-वृत्त्युपलक्षितात्मनोऽविद्यानिवृत्तिस्वरूपाङ्गीकारात् ॥ न चोपलक्षण-निवृत्त्या मुक्तेरपि निवृत्तिरिति वाच्यम्। पाके निवृत्तेऽपि पाचकानिवृत्ति-दर्शनेन व्यभिचारात्। तदुक्तं **वार्त्तिके**–

निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः ।
उपलक्षणनाशेऽपि स्यान्मुक्तिः पाचकादिवत् ॥

ननु वृत्त्युपलक्षितायाः मनोवृत्तेः पूर्वमपि विद्यमानत्वेन मोहकालेऽपि मोहहान्यापत्तिरिति चेद्, भ्रान्तोऽसि, पूर्वसिद्धस्योपलक्षणत्वायोगात्। न हि पाकसंबन्धात् पूर्वं पाचको भवति, तथा व्यवह्रियते वा । ननु तथापि कथं नष्टविद्यस्य जीवन्मुक्तस्य अज्ञवद्व्यवहारः, उपादानस्य नाशात् ? तथा विद्यालेशाङ्गीकारादिति चेत् तर्हि कोऽयमविद्यालेशः यत्सत्त्वे यथापूर्वं कर्तृत्वादिप्रतिभास इति चेत्, श्रोतव्यं सावधानेन। आवरणविक्षेपशक्तिमत्याः मूलाविद्यायाः विद्यया नाशेऽपि प्रारब्धकर्म-वर्तमानदेहाद्यनुवृत्तिप्रयोजको विक्षेपशक्त्यंशः। तदुक्तम् —

अविद्यावृत्तितादात्म्ये विद्ययैव विनश्यतः ।
विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ॥
उपादाने विनष्टेऽपि क्षणं कार्यं प्रतीक्षते ।
इत्याहुस्तार्किकास्तद्वदस्माकं किं न सम्भवेत् ॥
तनूनां दिनसंख्यानां नैतादृक् क्षण ईरितः ।
भ्रमस्यासंख्यकल्पस्य योग्यः क्षण इहेष्यताम् ॥
दशमोऽपि शिरस्ताडं रुदन् बुद्ध्वा न रोदिति ।
शिरोव्रणस्तु मासेन शनैः शाम्यति नो तदा ।

शमयत्यौषधेनायं दशमः स्वव्रणव्यथाम् ॥
भोगेन शमयित्वैतत् प्रारब्धं मुच्यते तदा ।
भोगकाले कदाचित्तु मर्त्योऽहमिति भासते ॥
नैतावताऽपराधेन तत्त्वज्ञानं विनश्यति ।
जीवन्मुक्तिव्रतं नेदं किन्तु वस्तुस्थितिः खलु ॥

अथवा निरवयवस्याज्ञानस्य लेशासंभवेऽपि क्षालितलशुनभाण्डानुवृत्तलशुनवासनाकल्पोऽविद्यासंस्कारः तथा च तेनैव व्यवहारोपपत्तेः । तदुक्तं **भामत्याम्**—

'न खल्वयं सर्वथा मनुष्याभिमानरहितः किन्त्वविद्यासंस्कारानुवृत्त्या तदभिमानोऽनुवर्तते । अनुवर्तमानं च मिथ्येति मन्यमानो न श्रद्धत्ते इत्युक्तम्—विधिषु श्राद्धोऽधिकारी, नाश्रद्ध' इति।

वार्त्तिककृद्भिश्चोक्तम्-

नन्वब्रह्मत्वधीर्यद्वदहं ब्रह्मेति बोधतः ।
निवर्तेत तथा द्वैतधीरप्यद्वैतबोधतः ॥
नैष दोषो यतो बोधः कृत्स्नाज्ञानं दहन्नपि ।
न दहेद् भोगहेतुत्वमारब्धप्रतिबन्धतः ॥
मण्यादयो यथा वह्नेः प्रतिबध्नन्ति दग्धृताम् ।
न तु प्रकाशसामर्थ्यं तथांशप्रतिबन्धनम् ॥
भोगोपयुक्तं देहादि यावत्तावन्न बाध्यते ।
विद्ययाऽनुपयुक्तस्तु बाध्यते जीवताभ्रमः ॥
मुक्तो बाणो यथा वेगक्षये पतति नान्यथा ।
असौ देहस्तथैवायुःक्षये पतति नान्यथा ॥
सुखदुःखविकाराद्यधियः साक्ष्यवभासता ।
भोगः प्रोक्तः स भोगश्च समानो मूढबुद्धयोः ॥

भोक्तृत्वमपि कर्तृत्वं चिदाभासगतं चिति ।
मूढ आरोपयेद् बुद्धो नेति वैषम्यमेतयोः ॥
सुखदुःखादिसंवित्तिः फलं पूर्वस्य कर्मणः ।
रागद्वेषक्रिया तत्र स्यात् फलान्तरसिद्धये ॥
रागादिपूर्वकं यस्मात् फलं जायेत कर्मणः ।
रागादिरहितं तत्तु निष्फलं सुप्तवागिव ॥

अथवाऽस्तु तेषामप्यदृष्टोत्पत्तिस्तथापि न तस्य तेन लेपः, परार्थत्वात्। तथा च **श्रुतिः**—

'तस्य पुत्रा दायमुपयन्ति, सुहृदः साधुकृत्यां, द्विषन्तः पापकृत्याम्'

इत्यादेरकृतौ तस्य परार्थत्वं स्फुटमिति तस्माच्छ्रवणादिपूर्वक-महावाक्यार्थावगमाज्जीवन्मुक्तिसिद्धिः। अनारब्धे नष्टेऽपि प्रारब्धस्यानाशात् । तथा च श्रुतिः —

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे[1]*॥ इति*

तदधिगमे उत्तरपूर्वाघयोरश्लेषविनाशौ *'तद्व्यपदेशाद्'* इति सूत्राच्चेति दिक्।

ननु कथं वाक्यार्थावगममात्राज्जीवन्मुक्तिः, तस्या भगवता पतञ्जलिनाऽष्टाङ्गयोगसाध्यत्वप्रतिपादनात् ? तथा हि–

---

१. हृदयस्य बुद्धेश्चिदात्मनश्च ग्रन्थिवद् दृढसंश्लेषरूपत्वात् ग्रन्थिरन्योन्याध्यासः । भिद्यते विदीर्यते विनश्यतीति यावत् । सर्वसंशया आत्मा देहादिव्यतिरिक्तो न वा, व्यतिरेकेऽपि कर्तृत्वादिधर्मवान् न वा, अकर्तृत्वेऽपि तस्य ब्रह्मणो भेदोऽस्ति न वा, अभेदेऽपि तज्ज्ञानं कर्मादिसहितं मुक्तिसाधनं केवलत्वे वेत्यादयश्छिद्यन्ते द्वैधीक्रियन्ते तत्त्वतः साक्षात्कृतस्य वस्तुनः, कर्माणि संचितानि पुण्यापुण्यलक्षणानि, क्षीयन्ते स्वनिदानाज्ञानविनाशेन विनश्यन्तीत्यर्थः ॥

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो ह्यष्टाङ्गानि। तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा *यमाः*। शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि *नियमाः* । स्थिरसुखमासनं पद्मस्वस्तिकाद्यनेकविधं, पूरककुम्भकरेचकादि च बहुविधः *प्राणायामः*। श्रोत्रादीनामिन्द्रियाणां स्वस्वविषयेभ्यो विमुखीकरणं *प्रत्याहारः*। हृत्पुण्डरीकादौ मनसश्चिरकालस्थापनं *धारणा*। एवमेकत्र धृतस्य चित्तस्य विच्छिद्य विच्छिद्य भाव्याकारवृत्तिप्रवाहो *ध्यानम्* । सर्वथा विजातीयप्रत्ययरहितः सजातीयप्रत्ययप्रवाहः *समाधिः*। स च चित्तभूमिभेदेन द्विविधः— सम्प्रज्ञातोऽसम्प्रज्ञातश्च । तत्र चित्तस्य पञ्चभूमयो भवन्ति— क्षिप्तं, मूढं, विक्षिप्तमेकाग्रं, निरुद्धमिति । तत्र रागद्वेषादिवशात् सर्वदा विषयेष्वभिनिविष्टं *क्षिप्तम्* । तन्द्रादिग्रस्तं *मूढम्* । सर्वदा विषयासक्तमपि कदाचिद् ध्याननिष्ठं क्षिप्ताद् विशिष्टतया *विक्षिप्तम्*। तत्र क्षिप्तमूढयोः समाधिशङ्कैव नास्ति, विक्षिप्तमपि तीव्रतरपवनविक्षिप्तप्रदीपवत् स्वयमेव नश्यति। *एकाग्रं* तु एकविषयधारावाहिकवृत्तिसमर्थं सत्त्वोद्रेकेण तमोगुणकृततन्द्रादिरूपलयाभावाद् आत्माकारा वृत्तिः। सा च रजोगुणकृतचाञ्चल्यरूपविक्षेपाभावात्॥ एकविषय एव शुद्धे सत्त्वे भवति चित्तमेकाग्रम् । अस्यां भूमौ सम्प्रज्ञातः समाधिः, तत्र ध्येयाकारा वृत्तिरपि भासते । तदुक्तम्—

ब्रह्माकारमनोवृत्तिप्रवाहोऽयं कृतिं विना।
सम्प्रज्ञातः समाधिः स्याद् ध्यानाभ्यासप्रकर्षतः ॥ इति

एतस्यापि *निरोधे*ऽसम्प्रज्ञातः समाधिर्भवति, स च सूत्रितो भगवता पतञ्जलिना । तस्यापि निरोधे सर्ववृत्तिनिरोधान् निर्बीजः समाधिः । तस्यापि विघ्नचतुष्टयं भवति, लयविक्षेपकषायरसास्वादभेदात् । *तत्राद्यः* विषयत्यागे सत्यप्यखण्डस्वरूपानवलम्बनेन चित्तवृत्तेः स्तब्धीभावरूपा निद्रा।

आपाततोऽखण्डवस्त्ववलम्बने कृतेऽपि चिराभ्यासाभावात् त्रस्तपक्षिवत् पुनर्विषयान्तरग्रहणं विक्षेपः । लयविक्षेपाभावेऽपि चित्तवृत्तेरनादिरागवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं *कषायः।* एतद्दोषत्रयाभावेऽपि सबीजसमाधिजनितैः संस्कारैः पुनस्त्रिधा आनन्दास्वादनं *रसास्वादः*। एवं विघ्नचतुष्टयेन रहितं चित्तं निर्वातप्रदीपवत् अचलम् अखण्डचैतन्यमात्रमवतिष्ठते । विस्तरस्तु **स्वरूपनिर्णये, अद्वैतब्रह्मसिद्धौ** च चतुर्थमुद्गरेऽनुसन्धेयः। तथा चैतादृशस्य चित्तनिरोधस्य सम्पादयितुमशक्यत्वात् कथं जीवन्मुक्तिः, कथं वाऽज्ञानतत्कार्यनिवृत्तिः। तदुक्तम्—

अप्यब्धिपानान्महतः सुमेरून्मूलनादपि ।
अपि वह्न्यशनात् साध्यो विषमश्चित्तनिग्रहः ॥

इति चेत्, सत्यम् । यथा ह्युक्तरीत्या चित्तनिरोधपूर्वकात्मसाक्षात्कारो जीवन्मुक्तिसम्पादकः । तथा च जगच्चैतन्यविवेकोऽपि श्रवणादिपूर्वको जीवन्मुक्तिसम्पादकः, न केवलं योग एवावश्यकः॥ तदुक्तं **वासिष्ठे**-

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ।
योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥
असाध्यः कस्यचिद् योगः कस्यचित् तत्त्वनिश्चयः।
प्रकारौ द्वौ ततो देवो जगाद परमः शिवः ॥

श्रवणं तु सर्वेषां वेदान्तानामद्वितीये ब्रह्मणि षड्विधलिङ्गैः तात्पर्यावधारणम्। षड्विधलिङ्गानि तु-

उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ।
अर्थवादोपपत्तिश्च लिङ्गं तात्पर्यनिर्णये ॥

तथा हि **छान्दोग्ये** षष्ठे-

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रम्य *'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा, तत्त्वमसि'* इत्युपसंहारः। ऐतदात्म्यमिदमित्यादेस्तत्त्वमसीत्यन्तस्य नवकृत्वो वचनमभ्यासः। *'आचार्यवान् पुरुषो वेद'* इत्यनेन मानान्तराविषयत्वरूपापूर्वत्वकथनम्। तस्य *'तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य'* इति फलकथनम्। *'तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवती'* त्यर्थवादः'। *'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'* इत्युपपत्तिरिति।

मननं तु श्रवणेनावधारितस्य प्रमाणगतप्रमेयगतसंभावनाविपरीत-भावनानिवृत्त्यर्थं नानायुक्तिभिश्चिन्तनम्। निदिध्यासनं तु श्रवणमननाभ्यां निष्पन्नस्याद्वितीयस्य स्वरूपस्य सजातीयप्रत्ययप्रवाहपूर्वकविजातीय-प्रत्ययराहित्यम्, न श्रवणमात्रेण । तदुक्तम् —

कुशला ब्रह्मवार्तायां वृत्तिहीनास्तु रागिणः।
तेऽप्यज्ञानतमो नूनं पुनरायान्ति यान्ति च ॥ इति

अत एव भगवत्पूज्यपादाः कुत्रापि ब्रह्मविदां योगापेक्षां न व्युत्पादयाम्बभूवुः। अत एवौपनिषदाः परमहंसाः श्रौतवेदान्तविचार एव गुरुमुपसृत्य प्रवर्तन्ते ब्रह्मसाक्षात्काराय, न योगे । तस्य रागद्वेषग्रस्तान्तःकरणपरत्वात् । तदुक्तम् —

बह्वाकुलितचित्तानां विचारात् तत्त्वधीर्न हि ।
योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति ॥
अव्याकुलधियां मोहमात्रेणाच्छादितात्मनाम् ।
सांख्यनामा विचारः स्यान्मुख्यो झटिति सिद्धिदः ॥ इति

अथ च **भगवत्पादैः** स्वमतानुसारेणैव सूत्रं व्याख्यातम् । तथा हि—

देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः ।
अनुरक्तिः परे तत्त्वे नियमः परिकीर्तितः ॥
सर्ववस्तुन्युदासीनभाव आसनमात्मनः ।
जगत्सर्वमिदं मिथ्याप्रतीतिः प्राणसंयमः॥
चित्तस्यान्तर्मुखीभावः प्रत्याहारः स उच्यते।
चित्तस्य निश्चलीभावो धारणा सा निगद्यते ॥
सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते ।
ध्यानेन विस्मृतिः सम्यक् समाधिरभिधीयते ॥

अत एव भगवता **वसिष्ठेन** भूमिकाभेदेन जीवन्मुक्तानामपि भेदा निरूपिताः। तथा हि —

ज्ञानभूमिः शुभेच्छाख्या प्रथमा सा प्रकीर्तिता।
विचारणा द्वितीया स्यात् तृतीया तनुमानसा ॥
सत्त्वापत्तिश्चतुर्थी स्यात् ततोऽसंसक्तिनामिका ।
पदार्थभाविनी षष्ठी सप्तमी तुर्यगा स्मृता ॥ इति ।

तत्र नित्यानित्यवस्तुविवेकादिपुरस्सरा फलपर्यवसायिनी मोक्षेच्छा प्रथमा । ततो गुरुमुपसृत्य वेदान्तवाक्यविचारश्रवणमननात्मिका द्वितीया। ततो निदिध्यासनाभ्यासेन एकाग्रतया सूक्ष्मवस्तुग्रहयोग्यत्वं तृतीयम्। एतद्भूमिकात्रयं साधनरूपं जाग्रदवस्थोच्यते, योगिभिर्भेदेन जगतो मानात्। तदुक्तम् —

भूमिकात्रितयं त्वेतद् राम जाग्रदवस्थितम् ।
यथावद् भेदबुद्ध्येदं जगज्जाग्रति दृश्यते ॥

ततो वेदान्तवाक्यान्निर्विकल्पो ब्रह्मात्मैक्यसाक्षात्कारः। चतुर्थी भूमिकात्रितयस्य फलरूपा सत्त्वापत्तिः स्वप्नावस्थोच्यते, सर्वस्यापि जगतो मिथ्यात्वेन स्फुरणात् ॥

तदुक्तम् —

अद्वैते स्थैर्यमायाते द्वैते च प्रशमं गते ।
पश्यन्ति स्वप्नवल्लोकं चतुर्थीं भूमिकामिताः ॥ इति

सोऽयं चतुर्थभूमिं प्राप्तो योगी ब्रह्मविदित्युच्यते। पञ्चमी-षष्ठी-सप्तम्यस्तु भूमिकाः जीवन्मुक्तेरवान्तरभेदः । तत्र सविकल्पक-समाध्यभ्यासेनावरुद्धे मनसि, या निर्विकल्पकसमाध्यवस्था सा असंसक्तिः सुषुप्तिरिति चोच्यते । ततः स्वयमेव व्युत्थानात् सोयं योगी ब्रह्मविदुरः। ततस्तदभ्यासपरिपाकेण चिरकालावस्थायिनी गाढसुषुप्तिरिति चोच्यते। ततः स्वयमनुत्थितस्य परप्रयत्नेनैव योगिनो व्युत्थानात् सोऽयं ब्रह्मविद् वरीयान् । यस्यास्तु समाध्यवस्थायाः न स्वतो न वा परतो व्युत्थानं भवति, सर्वथा भेददर्शनाभावात्, किन्तु सर्वदा आजन्म य एव स्वप्रयत्नमन्तरेणैव परमेश्वरप्रेरितप्राणवायुवशाद् अन्यैर्निर्वाह्यदैहिक-व्यवहारः परिपूर्णपरमानन्दघन एव सर्वतस्तिष्ठति सा सप्तमी तुरीयावस्था। तां प्राप्तो योगी ब्रह्मविद्वरिष्ठ इत्युच्यते । तदुक्तम् —

चतुर्थीभूमिकाज्ञाने तिस्रः स्युः साधनं पुरा ।
जीवन्मुक्तेरवस्थास्तु परातिस्रः प्रकीर्तिताः ॥

अत्र हि चतुर्थभूमिं प्राप्य स्थितस्य मृतस्य वा अष्टाङ्गयोगसाध्य-जीवन्मुक्त्यभावेऽपि तत्त्वज्ञानमात्रसाध्यजीवन्मुक्तिं प्रति विदेहकैवल्यं प्रति च नास्ति शङ्का, तदुत्तरभूमित्रितयस्य तु किमुत वक्तव्यमिति परमरहस्यम् ।

नन्वष्टाङ्गयोगं विना अन्तकाले मूर्च्छादिना ज्ञाननाशेन पुनः संसारापत्तिरिति चेन्न। अन्तकालशब्देन किमज्ञाननाशकाल उच्यते प्राणवियोगो वा ? आद्ये श्रवणादिनैव सिद्धस्य साधनान्तरानङ्गीकारात्। द्वितीये तु प्रारब्धप्राबल्यान्मूर्च्छादिना प्राणवियोगेऽपि तत्त्वज्ञानाविरोधित्वेन [न] संसारापत्तिः । तदुक्तम् —

सदद्वैतेऽनृतद्वैते यदन्योन्यैक्यवीक्षणम् ।
तस्यान्तकालस्तद्भेदबुद्धिरेव न चेतरः ॥
यद्वान्तकालः प्राणस्य वियोगोऽस्तु प्रसिद्धितः ।
तस्मिन् कालेऽपि न भ्रान्तेर्गतायाः पुनरागमः ॥
नीरोग उपविष्टो वा रुग्णो वा विलुठन् भुवि ।
मूर्च्छितो वा त्यजत्वेष प्राणान् भ्रान्तिर्न सर्वथा ॥
दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेऽप्ययम् ।
परेद्युर्नानधीतः स्यात्तद्वद्विद्या न नश्यति ॥
प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना ।
न नश्यति, न वेदान्तात् प्रबलं मानमीक्ष्यते ॥

वासिष्ठेच -

तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा।
ज्ञानसम्प्राप्तिसमये मुक्तोऽसौ विगतज्वरः ॥

उक्तं च भगवता पतञ्जलिनाऽप्या**र्यापञ्चाशीतिकायाम्**-

तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि त्यजन् देहम्।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः ॥
हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि।
परमात्मविन्न पुण्यैर्न च पापैर्लिप्यते विमलः ॥

तस्मात् सिद्धं पातञ्जलोक्ताष्टाङ्गयोगं विनापि वेदान्तविचारेण श्रवणादिपूर्वकेण कैवल्यमिति शिवम् ॥

नमामि वाङ्मनःकायैः ब्रह्मानन्दं गुरुं सदा ।
यत्कटाक्षैकलेशेन स्वरूपस्फुरणं हि मे ॥

*****

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीब्रह्मानन्दसरस्वतीभगवत्पूज्यपाद-
शिष्यश्रीसदानन्दविरचिते 'स्वरूपप्रकाशे' दृश्यपदार्थ-
प्रकाशनपूर्वकजीवब्रह्मैश्वर्यप्रकाशनं
नाम चतुर्थः परिच्छेदः ॥

राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058